This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-2698

| शिर्षक | ग्रंथकार | विषय | विस्तार (पुर्ण/ अपूर्ण) | टिकाकार | आकार | पृष्ठे | लिपी | सामग्री | Lines per page | Letters per line | Condition & age (शके/विकम सवंत) | Additional Particulars / Remark |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| कात्यायन सूत्र | कात्यायन | वेदांग | पूर्ण | - | 3/12 | 62 | देवनागरी | कागद | 09 | 36 | | |

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कै·सुबो·टी·१



॥श्रीगणेशायनमः॥ ॥प्रणम्यगणनायकंनिखिलविघ्नविध्वस्तयेगुरून्निगमगाहनाप्रलमतींश्च
विद्याकरान्॥पथायतिवितन्यतेगहनकर्कभाष्यांबुधौगुरूक्त्यनुगताजलप्रतरणायटीकातरी॥१॥०
चिकीर्षितस्यग्रंथस्यपरिपंथिप्रत्यहायोहायतपोतिशयसपासादितसकलशक्तेर्भगवतःकल्पप्रणे
तुःकात्यायनाचार्यस्यशिष्टाचारप्रमाणकंजयतिशब्दाक्षित्यंप्रणामंप्रस्तौति॥त्रयीसुसंवित्तीत्यादि
ना॥तत्रेयंपदयोजना॥कात्यायनस्ययहर्षेःपादपांसवःचरणरेणवोजयंतीति॥सर्वोत्कर्षवर्णा
नाक्षित्यसकलजगन्नमस्यत्वेनमयापिनयस्यतइत्यर्थः॥कथंपांसूनांचमलिनस्वभावत्वान्नमस्क
र्तृनैर्मल्यहेतुत्वमित्यतआह॥त्रयीति॥वेदत्रय्याःसुष्ठुसंवित्तिःसम्यक्पदार्थावबोधःतदुद्भूतो
योविवेकःमोक्षसाधनकर्माभिधायककल्परचनाद्वाराविष्टतोऽनेकशास्त्रस्यवेदस्यसकलविप्र
तिपत्तिपरिहारपूर्वकंसर्वकर्मेतिकर्तव्यताक्रमप्रकाशकत्वावबोधस्तेर्ननर्मलाःगतमोहा मंचा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रोशंतीत्यादिवल्लक्षणया स्वाश्रयगतधर्मस्तत्रारोप्यते ॥ अतश्च नतिकर्तृमतिनैर्मल्यहेतुता सैव न के
वलं ॥ किंतु समग्नायाः निश्रेयसस्य मोक्षस्य सिद्धे हेतवः ॥ व्याख्योपव्याख्यानरूपयोः सूत्रभाष्ययोर्वि
रोधात् ॥ वेदानंतर्यं तु कर्मणा संभवात्तदंगभूतासु परिभाष्यास्वपि योज्यते ॥ अतोंतिमस्त्वं परिभाषाणां
अतश्च भक्तवात्सल्यं समस्तस्य शास्त्रस्य शासनरूपत्वाद्वेदस्य सतत्वं सहवर्त्तमानं तत्वं ॥ पत्रतादृशं ज्ञा
नं तस्य बोधकाः पादपांसुनमस्कारेण च गुरुभक्त्यतिशय एव लक्ष्यते तस्याः सकलपुरुषार्थहेतुत्वात्
तथा च स्मृतिः ॥ यथा स्वननखनित्रेण नरो वार्यधिगच्छति ॥ एवं गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥ एवं
कल्पप्रणेतारं भगवंतं कात्यायनाचार्यं नमस्कृत्य कर्काचार्यो भाष्यकृत्सूत्राणि व्याख्याख्यातुमुपक्र
मते ॥ अथातोधिकार इत्यादि ॥ शास्त्रादौ विषयसंबंधप्रयोजनाधिकरिणो वक्तव्या इति तेषां पूर्वत्रा
भिधानादिहावक्तव्यत्वं दर्शयति ॥ शास्त्रावतारेति ॥ अत्र व्याख्यासन्निवेशादेतस्याध्यायस्यांतिमत्वं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥क॰सु॰टी॥१
॥२॥

ननु च सूत्रसन्निवेशात्वादिमत्वं भाति ॥ सूत्रोपात्ताथशब्दस्य वेदाध्ययनानंतर्यार्थत्वात्कर्मानंतर्यद्यो
तकत्वाभावात् तदयुक्तं भुक्त्वा व्रजतीत्यादिवत्पूर्वभावित्वमात्रेण नानंतर्यं किंत्वपेक्षितवेदाध्ययनानं
तर्यं कर्मखित्याह ॥ तत्रायमथशब्द इति ॥ अधिकारशब्देनेति ॥ न केवलं कर्तृव्यापारोधिकारः किं
तु फलाव्याप्तियोग्यत्वमिति ॥ तेन शुद्रस्य नाधिकार इत्यर्थः ॥ अपरे व्याचक्षत इति ॥ अस्त्रियन्नपि व्या
ख्याने भाष्यसन्निवेशादध्यायस्यांतिमत्वं ॥ सूत्रतोपि ॥ अथशब्दस्य कर्मानंतर्यार्थत्वात् ॥ फलावा
प्तिः प्रत्यक्षेणागमेन वेति विकल्प्य प्रथमं निराचष्टे ॥ नहीति ॥ द्वितीयं निराचष्टे ॥ आगमोपीति ॥
स्वर्गकामो यजेतेति पदयोः साध्यसाधनत्वेनासंबंधान्न फलावबोधकत्वमिति पूर्वपक्षयति ॥ नै
तदेवमिति ॥ निरर्थकयागाभिधानाद्वाक्यमनर्थकमित्याह ॥ यागमात्रेति ॥ अस्य कर्तव्यताफल
स्य साध्यताधात्वर्थो यागहोमात्मको तस्य स्वर्गमुद्दिश्य विधानेन स्मृतिरप्यनुगृह्यते इति सार्थकत्वे

एमः
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नपरिगृहीताभवति॥ द्वयोर्विधीयमानत्वेवात्वेवाक्यभेदात्॥ अद्यमानत्वेतु साध्याभावान्नैरर्थक्या
दन्योन्यसंबंधाभावादुद्देशकमुद्देश्यस्वर्गस्याभिधायकं॥ प्रतिनिर्देशकं विधेयस्य यागाभिधाय
कं यागोद्देशेन स्वर्गकामविधाने पुरुषप्रयत्नरूपयागस्य साध्यत्वाभिधानाद्वाक्य आनर्थक्यं॥ स्व
र्गकामयमानेनैव यागो भाव्य इति॥ नियमरूपत्वे च यागांतरत्वाददृष्टपरिकल्पना॥ तस्य स्वर्गकाम
स्य पुंस इष्टसाधनत्वेनोपकारकाः यागोत्तरकालादृष्टस्वर्गकाम इत्यादिवाक्येन फलत्वोक्तावदृष्ट
कल्पनाथाप्रपिवाक्यबहिर्भूतपुत्रपश्वादेः फलत्वोक्तावतीवादृष्टपरिकल्पना अन्यत्मयतेऽन्य
तुकरोतीत्यसामंजस्यन्यायोक्तीति तमर्थं सूत्रे योजयति॥ अपि चेति॥ उक्तेर्थे पूर्वाचार्याणां कारिकाड
दाहरति॥ आह चेत्यादि॥ फलार्थिन इत्यविशेषणदेवानामवाप्तकामत्वात्काम्येनाधिकारो देवांतराभा
वात्यागासंभवान्नित्येपि न॥ ऋषीणामार्षेयाभावादनधिकार इति॥ शाबरभाष्यमनुसृत्य व्याख्या॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥क॰सु॰टी॰॥१
॥३॥

वार्त्तिके तु अनादौ संसारे भवात्पूर्वं ऋषिसद्भावाद्दृषिणामप्यधिकारः॥ आसन्नासन्निहितवस्तुविष
यासन्निहिताधीर्येषां तेषां भावस्तत्वं॥ तस्मादेतेन पशूनां पूर्वापरानुसंधानत्वं उक्तं॥ अवैद्यत्वादि
ति॥ अवैदिकत्वात्॥ पंग्वादीनां विष्णुक्रयणाद्यंगत्यागेनापि कर्माधिकारे प्राप्त आह॥ विष्णुक्रय
णादिभिरिति॥ अतश्च विष्णुक्रयणादियुक्तकर्मस्वनधिकरणतदंगे आधानेपि नाधिकारः पं
ग्वादीनां॥ आधानादुत्तरत्र तु पंगुत्वादिसद्भावे यावत् जीवं प्रत्या यथा कथंचिन्नित्यं कर्म समापनीय
मेव॥ पूर्वं पंगुत्वेन अधिकार एव॥ अश्रोत्रियस्य॥ अनधीतवेदस्य॥ अद्रव्यत्वात्॥ दायादांशान
र्हत्वात्॥ आरंभसामर्थ्यादिति हेतुनैवांगहीनामनधिकारसिध्यास्य सूत्रस्य व्यर्थत्वमुक्त्वा परिहर
ति॥ अद्रव्येति॥ उपादानं परिसंख्यानं॥ अतश्च तद्व्यतिरिक्तस्य निर्द्धनस्यारंभसामर्थ्येप्यधिकारः॥ एमः
आरंभसामर्थ्यादिति हेतुना यथांगहीनाप्यनधिकारस्तथा निर्द्धनस्यापि माभूदित्यर्थः मस्तु दधिज ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वं॥ अष्टीवद्दघ्नं॥ जानुप्रमाणं॥ ननु शूद्रशब्दस्य स्वत आधानानधिकारे आहितेष्वग्निषु नाधिका
रः कर्तृगामिक्रियाफलाभिधाय्यादधीताख्यातश्रवणादित्यत आह॥ आत्मार्थं चेति॥ त्रपुजतुभ्यां
रंगलाक्षाभ्यां तप्ताभ्यां॥ स्त्रिया वेदाध्ययनराहित्येपि क्षौमे वसाता आदधीयातामित्यादि॰ तेराधा
नादावधिकारोस्तीति आह॥ स्त्री चेति॥ स्त्रियाः कर्मोपयोगिमंत्रपाठस्तु उपनयनराहित्येपि यथा
कथंचित् कर्तव्य एव॥ समध्यकं॥ उभयस्वामिकं अनतिचारोऽनतिक्रमणं॥ सूत्रकारप्रस्थानात्॥
स्थानांतरपठितसूत्रकारवाक्यात्॥ इतरासां पत्नीनां फलाधिकाराद्दासीपत्नीनां कर्ददातीत्यश्वमेधे
पुरुषव्यापाराभीष्टफलभागित्वमिति स्त्रिया भर्त्रा सहाधिकारः॥ स्मरणं मनोः अनेकार्थतोक्तानिरुक्ते
श्रुतिपक्षनिक्षिप्ता॥ अवयवार्थ [illegible] निरपेक्षपदार्थरूपत्वान्निरपेक्षशब्दरूपश्रुतिसाम्यं नी
तोतमवृद्धैः॥ अवयवार्थसापेक्षत्वात्पदांतरापेक्षवाक्यसपक्षीकृतो योगः॥ त्रैवर्णिकेषु मंत्रांतरवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥क॰सु॰टी॥१
॥६॥

नियोगाच्छूद्रस्यानधिकारादृभूणामिति मंत्रेण रथकारो जात्यंतरमभिधीयते॥ सौधन्वनशब्दश्च रथ
कारपर्यायो यंत्रांतरे दृष्ट इत्यत आह॥ सौधन्वना इति॥ विशिष्टविधानेन॥ कालविशिष्टाधानविधा
नेन रथकारस्याधान इत्यादीनां पूर्वव्याख्यायां त्वाधानोत्तरभाविनित्यनैमित्तिककाम्यकर्मस्वप्य
धिकार इति उच्यते॥ आधानाधिकारस्तु साक्षाच्छतत्वादेव सिद्धः यावदेव युक्तः क्रियया प्रत्यपदाभ्या
र्थं परमर्ष्टिस्वीकारेणेतरेषां ज्ञाननिश्चयोत्पादनात्॥ शाब्दिकानां रूढयौगिकयोर्म्मध्ये रूढस्य व
लवत्वांगिकारान्नयौगिकाशंका॥ अग्नेरात्प्रसंस्कारकत्वादाधानस्य चाग्निसंस्कारकत्वादाधानं प
त्यस्यात्प्रसंस्कारकमित्याह॥ तत्चेति॥ नाभावादिति सूत्रमन्वयमुखेन पूर्वपक्षेण योजयित्वा अ
धीतेनाव्यतिरेकेण पुनर्व्याख्याय सिद्धांतयति॥ एवमिति॥ आधानं संस्कार्याग्निद्वारेणोपरितन
कर्मार्थमित्यत आह॥ तत्चेति॥ संस्कारकेति तु प्रमादः पाठः तत्राप्ययमर्थः॥ आत्मसंस्कारकाग्नयो

रामः
४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथोपरितनकर्मार्थास्तथाधानमपि मीमांसायां तु ॥ आधानमग्निसंस्कारार्थमेव ॥ आग्नयस्तु अर्था
दुपरितनकर्मार्था एव ॥ अत्रत्वात्मसंस्कारकमग्न्यानयेश्चिंत्यं ॥ निषादो भिल्लः स चासौ स्थपतिरधिप
तिश्च ॥ यस्य रुद्र इति श्रुत्यात्रैवर्णिकानां रौद्रेष्टावधिकारः कूटं कृत्रिमं ॥ पित  दि ॥ लोके कूटिरिति प्र
सिद्धं ॥ पुरुषसंस्कारकत्वमाधानस्य चिंत्यं गर्दभावदानानां मस्त्वितरहविषां त्वग्नौ होमः ॥ शिश्नात्प्राशि
त्रावदानानां मस्त्वितरहविषां त्वग्नौ होमः ॥ शिश्नात्प्राशित्रावदानं न हृदयादिभ्यः ॥ वितानार्हाः ॥ तनु वि
स्तारे विशेषेण वितननं वितानः वैतानिकस्य पुंसः वितानिका अग्नयोस्य संतीत्यण् ॥ द्रव्यं प्रति देवतात्व
मिति ॥ तद्धितचतुर्थ्यंताभ्यां मंत्रवर्णेन वर्णेन वा ॥ उत्सर्गक्रियात्यागो मानसिकं कर्म ॥ स एव यागः प्रधा
नं फलसाधनं द्रव्यदेवते तु तद्विशेषणमते ॥ इदमग्नय इत्यादि परसत्तापादनं वाचिकं कर्म ॥ न ममेति तु
स्वसत्तात्यागो मानसिको तो नोच्चारणीयः ॥ तावुत्सर्गत्यागौ ऽनुज्ञा वा प्रोषिते यजमाने प्रायश्चित्तादौ यत्नी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰टी॰१
॥५॥

त्यागं कुर्यात् ॥ बहुद्रव्यकेपि स्त्विष्टकृतिसकृत्यागाः ॥ अयागहोमरूपमग्न्यन्वाधानादि ॥ समभिव्या
ह्रियंते संधिनूतान्युच्यंते ॥ पदान्यस्मिन्निति समभिव्याहारो वाक्यं ॥ तत्प्रकरणात् बुलीयंते न वै मृध
स्य पौर्णमासांगता न दर्शांगता ॥ सूत्रकर्तुः सर्वप्रमाणानुपन्यासे न्यूनत्वं प्रमाणद्वयमेव शेषविनियोजक
मिति वा प्रतिभाति ॥ तन्निराकर्तुमाह ॥ नैष दोष इति ॥ क्रमस्थानप्रमाणं ॥ तस्मिन्नन्यतराकांक्षसंबंध
कथनं उभयाकांक्षप्रकरणात् ॥ भेदे सिध्यर्थं सव्यपेक्षा अपेक्षा अभिषेचनीयः राजसूये सोमयागोऽधि
देवनं अक्षैर्दीव्यतीत्यक्षक्रीडनमुच्यते ॥ अधिदेवनादीन्मुमान्यतराकांक्षालक्षणक्रमादभिषेचनी
ये विनियोगोधिदेवनादीनामेव प्रधानाकांक्षत्वात् ॥ पितृभूत्याचार्येण यथासंख्यलक्षणात् क्रमाद
दध्विर्न्नामासीति मंत्रस्योपांशुयानुमंत्रेण विनियोग उक्तस्तदेव मीमांसामतं ॥ अत्र तु प्रकरणाद्याग
त्रयानुमंत्रणं चिंत्यं ॥ यजतद्यश्चाफलयुक्ता इत्युत्पत्तिवाक्ये षड्यागानामेव फलसंबंधश्रवणादन्येषां

एमः
५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रयाजादियागानामफलानां साध्याकांक्षत्वात् षड्यागांगत्वं प्रकरणात् ॥ अदर्शनाद्दर्श इति वैपरीत्यल
क्षणा ॥ तदंगता ॥ फलवत्संनिधावफलं तदंगमिति न्यायात् ॥ अपूर्वत्वसूचनार्थमिति ॥ प्रातिस्विकावां
तरापूर्वोत्पादनद्वारा परमापूर्वोपकारकत्वं मयाजादीनां तदंगत्वं ॥ द्रव्यत्यागरूपविशेषात्को विशेष
इति प्रश्नः यागहोमयोः प्रक्षेपावधिकतया विशेषभेदार्थं तिष्ठद्धोमादयो धर्मा उक्ताः ॥ न लक्षणत्वेन ॥
लोकप्रसिद्धत्वेपि लक्ष्यलक्षणसंबंधपूर्वकमेवानुकथने दृष्टं स्यात् ॥ तत्र च यागहोमयोर्भेदार्थे धर्मा
नुकथने दृष्टे सति नुयुक्तं ॥ पत्नीसंयाजादेरुपविष्टहोमादिधर्मदर्शनान्न यजतित्वं ॥ विधिवाक्ये यजति
जुहोत्युच्चारितत्वस्यैव यागहोमयोर्लक्षणात् ॥ शेषभक्षप्रतिषेधः स्थाल्यां शिष्टस्य भक्षणे प्रतिषेधो ऽ
तश्च क्षत्रियवैश्ययोरुपसवथे स्वयं होमेपि न स्रुच्यशेषभक्षः अत एव होमविधानं शेषभक्षप्रतिषेधो द
र्शपूर्णमासयोरपि ॥ द्वया वै देवा इति श्रुत्या ब्राह्मणानामेन परिक्रयार्थद्रव्यरूपदक्षिणाश्रवणादृजादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥क॰सु॰टी॰
॥६॥

कत्वेन प्रतिग्रहस्य रणात् चार्त्विज्यं नक्षत्रियवैश्ययोः फलयुक्तानामिति॥ काम्यानां श्रुतफलानि संबंधान्नि
त्यानां दुरितनिवर्हकत्वेन नैमित्तिकानां दोषपरिहारेण फलवत्त्वान्नित्यनैमित्तिकेष्वपि फला त्वाद्या
थाकाम्याशंकापलार्थिनं कर्त्तारं प्रत्येव कर्मविधानात्॥ नियमस्यावधारणैकरूपत्वाद्विकल्पो न संभव
तीत्याह॥ पक्षे नैतदिति॥ प्रागेव नियमात् पूर्वं नियमानंतरमपि पाक्षिकत्वे नियमानियमयोः संकरस्या
त्॥ नियमेष्वाहिताग्निकतादिषु कर्मणो धर्मो यावज्जीविकता॥ एकस्यात्यकालसाध्यस्य श्रुत्या प्रातर्वि
हितसमाप्तेरग्निहोत्रकर्मणो यावज्जीवविशिष्टं जुहुयादिति चोदनापदविहितत्वात् यावज्जीवं करणं
न संभवतीति लक्षणाभ्यासः स्यादित्याह॥ तत्रापीति॥ जीवनस्य कर्मत्वेन पूर्वपक्षे लक्षणादिदोषा
नुद्भाव्य कर्तृधर्मत्वेन सिद्धांते स्वार्थवृत्तिताद्यनुसंग्रहं दर्शयति कर्तृधर्मत्वे पुनरिति॥ ज्ञातः अग्निहोत्रं
जुहोतीत्युत्पत्तिवाक्येन कर्तृधर्मजीवननिमित्ताग्निहोत्रन्यायं दर्शपूर्णमासयोरतिदिशति दर्शपूर्णमासा

राम:
५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिष्विति॥ दर्शपूर्णमासयोर्नित्यत्वेवधारिते दाक्षायणगुणकल्पेनावृत्तयोस्तयोरेव पुनर्नित्यत्वानुकथनं
पुनरुक्तमित्यत आह॥ दाक्षायणेति॥ काम्येन दाक्षायणगुणेन संबंधात् नित्यदर्शपूर्णमासयोरपि काम्य
त्वं माभूदिति पुनर्वचनमिति अर्थः॥ आग्रयणेष्ट्यामपि अस्य रसस्य हुत्वा अथेममश्नामेति नित्यं नवान्ना
शननिमित्तत्वेन विधानादनिष्टाग्रयणेन नवस्याश्नीयादिति प्रायश्चित्तविधानात् च नयाथाकाम्यं यत् च
केचिदपि वाऽक्रियापवेष्वित्याश्वलायनसूत्रमनुसत्यपवाग्रयणं नाद्रियते तन्माध्यंदिनानामप्युक्तं स्वशा
खामामुतयोरप्यविशेषेण नियताश्रवणात्॥ तं वै पशुमनीजानं पुरुषं संवत्सरो नातीयान्नातिक्रामेदि
ति तं पुमांसं संवत्सरं नातिक्रामेत्किंतु संवत्सरपध्य एव कुर्यादित्यर्थः एकः काम्यः॥ नैयमिकः नित्यः॥ ए
षां सत्रयाजिनां दीक्षितत्वान्न जुहोति न ददाति इति सोमस्याप्रासत्वात्॥ अनंतरितः॥ अनुल्लंघितः॥ वसं
ते कृत इति यावत्॥ ध्रुसानामिति॥ नित्यकर्त्तव्यतारूपसामर्थ्येन स्वस्वकाले प्रासानां पशोर्निरूढस्य सोमस्याग्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰टी॰
॥७॥

ष्टोमसंस्थस्य ज्योतिष्टोमस्य बहुवचनं कर्मावृत्त्यपेक्षमसंभवे कर्तुः करणासामर्थ्येन नानिष्पत्तीं निपूज्य
र्थां अकरणप्रत्यवायदोषनिवृत्त्यर्थो प्रायश्चित्तार्थमिति यावत् ॥ वैश्वानरीं वैश्वानरदेवताकामकृप
र्ययेवर्षस्यातीतत्वे नित्यं प्रत्यब्दकर्तव्यत्वान्निर्वपेत् ॥ पुरोडाशनिर्वापात्मिकां कुर्यात् ॥ स्मृत्यंतरानुसा
रेण चातुर्मास्यानामप्यनुत्सर्गपक्षे निपूत्यर्थमेतामिष्टिं कुर्यात् ॥ यस्य यस्य निष्कृत्यर्थं कुर्यात् तस्य त
स्यैव काले कुर्यात् ॥ आवृत्तिमुखयोः पशुकरणे तयोरेव कुर्यात् ॥ केचित् सर्वनिष्कृत्यर्थमेतामिष्टिं
मेकपुरोडाशात्मिकां केचित्तावत्पुरोडाशात्मिकामेतावमन्यंते ॥ तच्चायुंक्ते ॥ प्रतिनिमित्तं नैमित्तिकमावर्त्त
त इति न्यायात् प्रतिनिमित्तमेकैका स्यात् ॥ दर्शनात् चेति सूत्रस्याग्निहोत्रादिसर्वशेषतास्यादिति मतां
तरमाह अपर इति कारणांतरेण सोमादिषु सवनादिना अनुग्रहसिद्धिः उत्सर्ग इति नित्यत्वमाशंक्य
तन्निराकर्तुं नित्यलक्षणमाह अपि चेति अतश्च उत्सर्गेप्यवश्यक्रिययैव नित्यत्वमवसेयं धात्वर्थमा

रामः
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रं यागपात्रं तेनेति यागरूपेणाधात्वर्थेन अन्यस्य फलस्य साधनत्वेनेति उत्पत्तिवाक्यशिष्टफलसाधन
त्वेन न च नित्यानां अकरणप्रत्यवायपरिहाररूपस्य दुरितक्षयरूपस्य वा विधेरिष्टसाधनत्वान्यथानुपक
ल्पितस्य संभवेपि उत्पत्तिवाक्यशिष्टं फलं संभवति यदि द्विगुणं फलं न साधयेद्द्वैगुण्यपरणाय विधीयमानः
प्रायश्चित्तविधिव्यर्थः स्यात् तत्तु च तथा तस्माद्द्विगुणमपि फलसाधकमिति विपर्यये पर्यवसानेन वै
ते जुहुयादित्यादयः विधिविभक्तेरभावात् अमात्यप्रापणरूपस्य विध्यर्थं विभक्तेरभावात् अंगप्रधानभे
दात् यावत् जीवनिमित्तकस्यांगनिरपेक्षयागमात्रस्यैव फलसाधनत्वाद्द्विगुणेपि नित्ये फलाभिनिर्वृ
त्तिर्भवतीति पर्वपक्षयित्वा सगुणमेव नित्यं फलसाधनमिति सिद्धांतमुपक्रमते अपर इति दैवान्मानुषा
द्वा मतिबलात् दैवाद्दैवकृतात् अंधत्वादेः मानुषाः मनुष्यशक्त्यभावकृतात् प्रतिबलात् मतिबंधात् लप
संहारः संभूयसंपादसतं यावज्जीवनिमित्तकनित्यकर्मविधायकवाक्यस्येत्याश्रये यावज्जीवं सगुणकर्तव्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰टी॰१
॥८॥

तानुपपत्या यथाशक्नुयादिति पदार्थः कल्प्यते सिद्धांते वैषसूत्रार्थः विगुणे शक्त्या संपादनगुणहीने नि
त्ये कर्मणि फलस्य अकरणप्रत्यवायपरिहाररूप दुरितक्षयद्वारस्वरूपस्य वा निर्वृत्तिः निष्पत्तिः अंगप्रधा
नयोः साक्षात्फलसाधनत्वं तदुपकारकत्वरूपभेदात् नहि उपकारकाभावे उपकार्यस्यावश्यकर्त्तव्यतायो
ग्यस्यापि क्रियायुक्ता॥ अतः फलाभावे अक्रियैवस्यादिति नित्यकर्मसु यथाशक्नुयादित्युपपदार्थः क
ल्प्यते इति भावः एवं च कृत्वा नित्ये अंगदर्शनाद्धेतोः महापितृयज्ञे साकमेधांतःपातिनि पित्र्य चातुर्मास्य
कर्मणि विशेषे स्त्रामोनात्सारोग अक्ष्यामपश्चक्षुरोगः नित्यं विगुणमपि फलं साधयति इत्युक्त्वा का
म्यं सगुणमेव फलं साधयतीति सिद्धांतितं अतो विगुणस्य काप्यसासांग एव न प्रायश्चित्तादिना विगुण
परिहार इत्याशयवान्मृच्छति प्रायश्चित्तविधानं तर्हीति॥ तत्कालमपि सगुणहानिकालं यस्य प्रायश्चि
त्तस्य समापनीयमेवेति देवताभ्यो वा एष दृश्यते योपक्ष इत्युक्त्वा सवानयजत इत्युक्तदोषपरिहाराय प्रा

राम:
८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यश्चित्तपूर्वकं समापनीयमित्यर्थः फलाभावेपीति विगुणस्य काम्यस्याफलत्वाद्दोषपरिहारः उपक्रां
तात्समापनरूपनरूपदोषपरिहारः॥ तेन पूर्वोक्तदोषपरिहारेण प्रायश्चित्तस्य फलवत्वं न काम्यफ
लेन विगुणस्य काम्यस्याफलत्वात् तावत्प्रमाणतेति वृष्टिदर्शनेन प्रमाणताविधानं कर्मणः॥ न
त्वर्द्धानुष्ठितायाः कतिपयांगहीनावृष्टिफलकथनं वृष्टिस्तु सतु स्वभावजनितैव श्रुतिविहितताव
त्प्रमाणाया इष्टेसु फलरूपा वृष्टिः कदाचिद्भविष्यति॥ वृष्टिदर्शनप्रमाणताप्रतिपादकवचनादेवे
यमंगहीनापि काम्येष्टिस्तत्फलान्यानि तु काम्यकर्माणि सागान्येव फलसाधनानि न विगुणानि॥
पादावसानापादौ पादेषु अवसानं विच्छेदो यस्याः सा तथा तद्विपरीतं तु यजुः॥ यथा देवस्य त्वेत्या
दि हस्ताभ्यामित्यत्रावसानं आददे नारिरसीत्यच च॥ प्रगीतं प्रकर्षेण गीतं गीतिप्रधानमित्यर्थः॥
सा स्तुतिः साम्नेति गीत्यात्मकेन॥ एवं वक्तव्येति सृक् गीत्योर्भेदात् सृचि आरूढं साय॥ अनृच सृग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰टी॰
॥९॥

क्षरोच्चारणरहितं इत्येत्वमादीनि उपपत्त्यर्थानि मार्थकानि ॥ प्रैषाः ॥ यजुरूपाः ॥ अग्नीदग्नीन्विहरेत्या
दयः ॥ प्रैषाणां च मंत्रवे मंत्रांतैः कुर्यादिरिति धर्मोक्षरोच्चारणवैगुण्ये मापश्चित्तं च प्रयोजनं किंप
न्यात्रमिति प्रश्लिष्टपाठात् नैरुत्सुक्यात् ॥ नैराकांक्षात् ॥ साकांक्षे मंत्रवासे लौकिकमपि क्रिया
पदमध्याहृत्य योजनीयं अस्मिन्नर्थे सूत्रमवतारयति ॥ मिथ इति ॥ अध्याहारो निराकांक्षयित्य
नेनैव सिद्धौ ॥ तदिदं सूत्रमनुषंगपरतया योजयितुमाह ॥ अपि चेति ॥ कर्मविवियुक्तमंत्रपदानां
साकांक्षत्वे तदाकांक्षनिवर्त्तकं संबंधयोग्यं पदान्तरमन्यान्वितमपि विभज्यानुषंजनीयं ॥ तद
भावे त्वध्याहार्यमित्यर्थ अध्याहारपदस्य लौकिकत्वादुच्चारणादिवैगुण्येन प्रायश्चित्तं किंतु
पुनः पुनः संशोध्योच्चारणमेव ॥ अनुषंगपदवैगुण्ये वैदिकत्वात्मापश्चित्तं भवंत्येव ॥ भाष्ये
ततो निर्भक्त इत्याद्यनुषंगविधानं चिंत्यं ॥ प्रतिष्ठायारिर्भक्त इत्यादेरेवानुषंगदर्शनात् ॥ अथवा

रामः
९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत अप्रतिष्ठादि पंचम्यंत प्रयमृष्टं भाष्ये॥ तत अन्नात्॥ ततः प्रतिष्ठायाः निर्भक्त इत्यनुसंगः॥ प्रकरणसम
वधीतानामेव तदर्थप्रकाशकत्वाद्विनियोगः प्रकरणांतरपठितानां तु वचनात्॥ सर्वमंत्राणां प्रतिकर्मविनि
योगेपि अनुक्तविनियोगानामर्थाद्वितीयोगसिध्यर्थमिदं सूत्रं इत्याह॥ अनुक्तेति॥ सान्निपात्यः संयोगः
अभिहितः संपूर्णोभिहितो न धर्मः॥ मंत्रपाठस्यादृष्टार्थत्वमंगाकृत्यावात्स्यपक्षः॥ मंत्रेण स्मृतं मंत्रेण प्र
काशितत्वात्स्मृति रूढं॥ मंत्रेणैव कर्मस्मरणे द्वे हेतुमाह मंत्राम्नानेति॥ त आद्युक्ता इति स्वसूत्रपरिभाषे
यं॥ वाक्यसमुच्चयेति॥ यत्र बहुवाक्यात्मको मंत्रस्तदर्थमिदं सूत्रेण॥ यथा सुक्ष्मा चासि शिवा चासि इति॥
असति चास्मिन्सूत्रे सुक्ष्मा चासि शिवा चेत्यावानेव मंत्रः स्यात्॥ एकासि क्रियायोगेनैव निराकांक्षात्॥ त्र
यो वेदा अजायंत इत्युपक्रमः॥ उपांशु यजुषेत्युपसंहारः॥ सृगादीनां वेदोफलक्षणार्थत्वाद्दृग्वेदविहि
तानामिति विदापदि यजुषा यप्युच्चैष्टं॥ यजुर्वेदविहितानामाधानचयनांगसाम्नापशुंशुत्वं॥ सामवेदो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्तानि यजुंष्युच्चैः॥ यानि तूभयवेदविहितानि तेषां श्रुतिद्वयप्राबल्याद्विकल्पः प्रयोक्तारो याज्ञिकाः॥ ब
र्हिरदंति वर्हिराप्तः॥ तत्सादृश्यात्संस्कृतवर्हिः सादृश्यात्॥ अर्थात्परिमाणमिति सूत्रं वर्हिस्तृणाती
त्यादावनुक्तपरिमाणवर्हिरादेर्वेद्याच्छादनरूपार्थसाधनसमर्थप्रमाणार्थं च उत्परिमाणस्य सुचादेव
सोर्द्धारादौ अर्थात्परिमाणबाधार्थं वा॥ वसोर्द्धारा होमश्चमकानुवाकपाठसमकालः॥ यूनानां लौकिक
पूरकरणप्रक्रियया अगणिततृणावर्त्तमानरूपया कृतानां अयुग्माविषमा एकत्रिपंचादयः॥ अतश्च
यूनमयुग्मतृणमु त्मकं भवति॥ आचिनोति स्थापयति॥ पश्चाद्भागो मूलभाग इति यावत्॥ वर्हिष्य
संभवादिति॥ यद्यपि प्रागग्नस्थापितेध्येषु य एव पश्चाद्दिग्विभागः स एव मूलभाग इति प्रत्यक्शब्दो दि
ग्वाची संभवति तथाप्युदगग्नस्थापितवर्हिषु मूलभागस्य दगग्नस्थापितवर्हिषु मूलभागस्य दक्षिणादि
क्स्थितत्वात्प्रत्यक्शब्दस्य प्रतीचिकत्वासंभवः॥ तथा चेध्मावर्हिषोर्मूलभागे यूनग्नं थेरवगूहनकार्यं



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथायूनाग्रमूले इध्मावर्हिर्मूलसंमुखे तिष्ठतः ॥ परिधिवृक्षाणां पलाशादीनां संबंधिनी अष्टादश का
ष्ठानि ध्यं कुर्यात् ॥ अतश्चैकविंशतिपक्षे ॥ त्रीणि परिध्यर्थानि अष्टादश त्वरत्निमात्रापि प्रमाणवैषम्ये
पि एकयूनवद्धानीध्यार्थमुपकल्पयेत् ॥ यज्ञपार्श्वे परिधीनां रत्निमात्रत्वोक्तेररत्निमाणताऽस्मिन्पक्षे पृथ
क्पक्षेषाहुमात्र्यः ॥ यस्मिन्पक्षे इध्मप्रोक्षणेनैव तदंतर्गतपरिधिप्रोक्षणसिद्धिः पात्रासादनं च विधृत्यो
श्चाज्येन साहद्वंद्वतासादने इति विशेषः ॥ आपरिमितं प्रमाणात्भूयः ॥ एकविंशत्यधिकद्वविंशत्यादि प्रण
यनमग्निप्रणयनार्थं त्रियूनं उक्तलक्षणैस्त्रियूनैः स्थानत्रये वद्धं ॥ रोषशेषिभावः अंगांगिभावः ॥ सामि
धेनीनां करणत्वादंगत्वं प्रक्षेपस्य कार्यत्वादंगित्वं ॥ ल्यप्कालार्थः ब्रह्मकर्तृकाज्यनिर्वापात् ॥ यजमानक
र्तृकवेदबंधनस्योत्तरकालताज्ञापनार्थः ॥ नाज्यनिर्वापविधानार्थः ॥ अन्यत्र विहितत्वात् ॥ अतश्च काल
ज्ञापनमात्रपरेल्यपि नैककर्तृत्वमास्थेयं ॥ कुरामुष्टिपंचाशत्कुशतरुणात्मकं ॥ सव्यावृतं प्रदक्षिणावृतं स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰ श्री॰
॥१७॥

व्यं वाममावृतं वाह्यत्वेन॥ यत्रेति व्युत्पत्त्या सव्यावृतं वत्सजानुसदृशं वेदं पशुकामः कुर्यात्॥ त्रिवृतं वेण्याकारं
ब्रह्मवर्चसकामः मूतकार्यं अन्नादिद्विगुणीकृत्य तयाम इति यावत्॥ न अपवृतः अनपवृतः न चेदनपवृत इति
संबंधः॥ द्वौ नञौ प्रकृतमर्थं गमयतः अपवृतः समासकर्मेत्यर्थः प्रकरणोत्पत्तेरनारभ्य श्रवणस्य च फलित
मर्थमाह॥ वाक्यप्रकरणाभ्यामिति॥ चोदक अतिदेशवाक्यं॥ चोदनासारूप्यात् सौर्यं चरुं निर्वपेदिति वैकृती
चोदना॥ आग्नेयमष्टाकपालं पुरोडाशमिति प्राकृती॥ उभयोर्निर्वपेदिति चोदनायाः सारूप्यात्॥ रूपो
दाहरणमिति॥ खादिरत्वस्य विकृतसंबंधनिर्वृत्तेः कार्यस्याविद्यमानत्वात्॥ अतः खादिरत्वस्य चोदकद्वा
रा साक्षाद्वातिकृतिसंबंधेन कश्चिद्विशेषः॥ अन्येपीति॥ यस्य पर्णमपी जुहूर्भवतीति॥ पर्णत्वादयः का
र्योदाहरणमाह॥ तांडक इति॥ तांडके सामकाह्मणे॥ प्रतिपत्कल्पाः प्रतिपत्स्तोत्रस्याद्याकृतस्याविकल्पाः
काम्या अनारभ्याधीताः॥ वैकंकतानि इत्युत्सर्गविधिः॥ अहोमसंयुक्तानि ध्रुवादीनि पिंडपितृयज्ञे मे

रामः
११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षणादर्व्यादीनि ॥ अतश्चाग्रयणादिचरुमेक्षणान्यहोमसंबंधाद्वारणानि ॥ स्रुचः जुह्वाद्याः ॥ पाणिमात्रपुष्क
राः पुष्करं भांडमुखं ॥ पाणिप्रमाणं मुखं यासां ॥ त्वग्विलाः त्वाग्न्यपदेशे विलं खातं यासां ताः ॥ पाठनेपि त्व
च्येव विलं न काष्ठमध्यदेशे ॥ खातं च शरावाकारं ॥ अर्थात् ॥ च निम्नत्वाप्रमाणं ॥ अत्र पुष्करशब्दस्य का
ष्ठात्मकपात्रमुखवाचकत्वात् तस्य च पाणिपाणिपात्रत्वोक्तेः स्वातपीणिसहितमपि पाणितलान्नातिरि
च्यते ॥ हंसमुखप्रसेकः हंसमुखाकारः प्रसेको यासाम् ॥ लदेशे दंडो यासां पणिबंधनात्करमूलास्थितरेखा
श्रयस्थानात् ॥ अंगुष्ठेति ॥ यद्वृत्तं कृतं तत्पालिका काष्ठमप्यंतरभावांगुष्ठपर्वप्रमाणं भवति तावत् ॥ पुष्करं
यस्य खातं च नासिकापुटवदुपरि विस्तृतमधः संकुचितं चत्वारिंशत्वगुंजायिताज्यधारणसमर्थमित्यु
त्कलाः ॥ गुर्जरास्तु अंगुष्ठपर्वप्रमाणेन व्यासार्धेन यद्वृत्तं निम्नतायां च पर्वप्रमाणमेव तावत्पुष्करं भवती
ति प्रयत्नाः ॥ तत्रोत्कलपक्ष एव साधायानिव प्रतिभाति ॥ मात्रावदधिपयसोरित्यत्रेतत्प्रमाणस्योपयोगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰ सु॰ टी॰
॥१२॥

त्॥ अस्याकृतिः खड्गाकृतिः प्रमाणं तु यज्ञपार्श्वात्॥ आदर्शाकृतिर्वर्तुलं॥ चमसाकृतिचतुरश्रं अर्थलक्षणं
प्रीतिकायार्थं यज्ञमनमागमनं च॥ तत्र च ऋत्विकादीनां संचरश्च विहारप्रथमप्रथमप्रदेशे॥ आचमना
द्यर्थं॥ निर्गमने च॥ न हविराद्यादायगमनागमनयोः इत्युत्कलाः गूर्जरास्तु वेदिप्रदेशनिर्गमनार्थं संच
रं मन्यंते॥ एवंम्य इति॥ प्रतिनिधिनानारंभ इति सिद्धांतः॥ प्रतिनिधिनारब्धव्यमिति नित्यस्य कालः अ
र्थाते प्रतिनिधिनाप्यारंभः॥ नियममात्रमिति॥ अविशेषेण द्रव्यमात्रे प्राप्तौ॥ परिसमापनीयमिति॥ मु
ख्येनारब्धे नित्ये मध्ये च तन्नाशे इत्यर्थः॥ यद्येवमिति॥ यदि यावज्जीवश्रुत्युपरोधेन नियमत्यागस्तर्हि
कुतः श्रुतद्रव्यं सामान्यं नियम इत्याशंका॥ सदृशोऽपीति॥ रसरूपादिभूयोवयवसाम्यात्॥ व्यक्तिविशे
षणमिति॥ व्रीह्यादिव्यक्तेः दीर्घशूकत्वतुषत्वादयो विशेषाः ते शाल्यादिप्रतिनिधौ गृहीते गृहीता भ
वंतीति॥ नित्यैसमानमिति॥ अवश्यं समापनीयत्वेन॥ पूतीकानिति॥ केचित्सपत्रं सोमं पुतिकयाहुः॥

रामः
१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यार्थं पुनर्ग्रहणं इत्यत्र पूतीकस्य सोमाद्विसदृशतां व्याकुर्वाणस्य भाष्यकृतोप्ययमेवाभिप्रायः उत्कलास्तु
पल्वलोत्पन्नसोमाकारं तृणविशेषं पूतीकामाहुः ॥ कृष्णलहोमेति प्रयाजे प्रयाजे कृष्णलं जुहोतीति वाक्यं
तस्मादिति ॥ काम्ये प्रारब्धे मुख्यद्रव्यनाशे विफलमपि ॥ तच्छिष्टविगर्हणे दोषपरिहाराय प्रतिनिधिना स
मापनीयमेवेत्युपसंहारः ॥ तंत्ररत्ने तु ॥ विगुणादपि काम्यादवस्य परिसमापनीयत्वात् किंचिन्न्यूनं फलं भ
वतीति सिद्धांतितं ॥ तन्न प्रसज्यत इति ॥ व्रते प्रसांग इति सूत्रेण यत्नः प्रसज्यत इत्युक्तं तन्नेत्यर्थः ॥ इष्टाशनं ॥
दीक्षिताः प्राक्भोजनं ॥ व तदुग्धनाशे प्रतिनिधौ क्रियमाणे लौकिकं दुग्धं दोषपरिहाराय प्रतिनिधिना
समापनीयमेव हनादिसंस्काररहितमेव श्रौताग्न्यधिश्रितं ग्न्याह्यं ॥ तस्याप्यप्राप्तौ लौकिकं दध्याहि ग्राह्यमश्रु
त एव ॥ भूयो वयवेति बहुयवैः समत्वेन ॥ श्रुतद्रव्यशब्देनैवेति ॥ प्रतिनिधेरप्यनुवाक्याप्रैषादौ ॥ जात्यभावा
दिति ॥ पूतीकजातेर्विधानाभावात् ॥ रुहुतेति ॥ पूतिकगतविशेषनियमः आज्येनेति ॥ पृषदाज्ये सत्यपि दध्ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰टी॰
॥१३॥

ज्यस्य प्राधान्यादयं प्रयोगः॥ पृषदुणकं चित्रगुणकं॥ यस्मिन्निति॥ सर्वविकल्पोदाहरणनिर्देशः यवादि
ग्रहणं तु विकल्पोपलक्षणार्थं॥ प्रतिनिधानिति॥ श्रातद्रव्याभातिनिधस्तदभावे श्रुतमेवेति सिद्धांतः॥ अ
र्थाभिनिर्वृत्तिसमर्थं नियोजनादिसमर्थं॥ प्रतिनिधिद्रव्यमिति॥ खदिरस्य बदरादि॥ संप्रत्ययो विश्वासः
अनुगृहीतं अवच्छिन्नं॥ अंगकर्माणि॥ अग्न्यन्वाधानादीनि॥ प्रधानकाले दर्शपूर्णमासयोः पूर्वाह्णका
लो यथा द्वादशाहे सत्रात्मके॥ यत्यावघातपेषणयोः क्रमेणैवानुष्ठाने पुरोडाशरूपोर्थः सिध्यत्यन्यथा
नेति क्रमे वश्यंभावी॥ सूत्रकारप्रस्थानात्॥ स्थानांतरवर्त्तिसूत्रकारवचनात्॥ वेदवाक्यमूलताकथनेन
सूत्रस्यैव प्रामाण्यकथनं॥ प्रकृतौ॥ ध्रुवासमंजनमुत्तराघारमाघार्येति॥ ल्यबादेशसंयुक्तमिति॥ तदुत्त
रकालभाविविकृतौ चोत्तराघारमाघार्य पशुपूर्वं समनक्तीति पशुसमंजनमपि ल्यबादेशयुक्तत्वा
दुत्तराघारकालभावि॥ उभयोराघारोत्तरकालप्राप्तौ सत्यां युगपत्क्रियासंभवादाघारोत्तरकालं वैकृतं

राम:
१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधायपश्चात्माकृतमुत्तवैपरीत्यमिति॥ संशयेनिर्णायकमिदंसूत्रं॥ पूर्वंप्राकृतंपश्चाद्वैकृतमिति॥ एतदर्थंचप
शुसमंजनेपूर्वग्रहणंकृतं॥ एतत्सूत्रवलात् प्राकृतंध्रुवासमंजनमेवपूर्वम्माभूदिति तथाप्रकृतौप्रियेणध
म्नेतिहवीꣳ वेधांकत्वाध्रुवाअसदन्निति सर्वाण्यालभतइति हविरालंभनादित्यवादेशसंयुक्तमाज्यासादनो
त्तरकालभाविज्योतिष्टोमेचआसाद्याजानिदक्षिणेनसिकृष्णाजिनंमास्तीर्यतिकृष्णाजिनास्तरणाद्याज्यासाद
नोत्तरकालभावि॥ तयोर्युगपप्राप्तौ प्राकृतंहविरालंभादिप्रथमतः पश्चाद्वैकृतंकृष्णाजिनास्तरणादिस्वसूत्र
परिभाषाचेयं॥ श्रुत्याभिमतमनपेक्ष्यश्रुतिपदेनोक्तं॥ समासेकर्मणि॥ ब्राह्मणतर्पणं॥ श्रुतिपाठक्रमस्तुप्रा
शित्रावदानानंतरंप्राप्नोति गुणकांडः गुणसमूहः आवर्त्तयितव्यं समापनीयंपदार्थमनुसमयः अवस
रः पदार्थांतरस्योतिपदार्थानुसमयः तस्मात्पदार्थानुसमयइति॥ सर्वत्रप्रयोगवचनोवाध्यतइति॥ सक
लगुणकांडसहितस्यैकैकप्रधानस्यपरस्परासंबंधात्सहत्वाभावात्॥ परिह्रियतइति॥ सहत्वेसमानजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰ सु॰ टी॰
॥१४॥

तीयव्यवधानानंगीकारात् ॥ मुख्यक्रमं प्राकृतिकाविति ॥ सरस्वंतौ भवत इति ॥ एकवाक्यविहितयोः प्र
धानयोर्याज्यानुवाक्यवशात्क्रमेव धारितेतमेव क्रममाश्रित्यांगानि प्रवर्त्तन्त इत्यंगं मुख्यक्रमः प्रावृत्तिको यथा
प्रथमसंस्कार उपाकरणे यः क्रमः स एव नियोजनादिष्वपि सहकृतानां ससदशप्राजापत्यपशूनां इति प्रथ
मसंस्कारक्रममाश्रित्य प्रवर्त्तमानः ॥ द्वितीयतृतीयप्रभृति ॥ द्वितीयस्य कृत्वा प्रथमस्य क्रियमाणे ससदशभि
तृतीयस्य कृत्वा द्वितीयस्य कृत्वा प्रथमस्य क्रियमाणेऽष्टादशभिः पदार्थैः नियोजनप्रोक्षणैः प्रथमस्य प
शोंगं उपारिष्यन् ग्रहणसादनादिषु ॥ वृवच्छेद्यन्यवच्छेदकभाव इति चतुःसंख्यामुष्टीन्व्यवच्छिनत्तीति अर्था
देव न वाक्यादिति वाक्यभेदात् ॥ वाक्येन तूभयोर्निर्वापसंबंध एव ॥ आवांतरावयवयुतेनापदार्थेनानुस
मयो नावयवेति ॥ ग्रहणं सादनमिति ॥ ग्रहणामंतर्यामादीनीं अवदानं प्रदानांतं हविषां सर्वांगानां हवि
रादीनां प्रधानं प्रतियागं प्रतिनित्याकरणे प्राधानाकरणं विशिष्टतरो दोषः गुणभूतानां पदार्थानां व्यवधा

रामः
१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नंत्वल्पः कर्ममध्येक्षुतादावाचमनं शुचिनाकर्यकर्त्तव्यमितिशुचित्वरूपकर्माधिकारप्रतिपादनात्क्र
तुनासंबंधक्रत्वंगानामव्यवधायकं इहत्वसंबंधेननित्यकर्मणाव्यवधानंदोषोप्यदोषएव नित्य
प्रधानकरणात्युदार्थव्यवधानस्यानस्यातुल्यत्वात्समयाध्युषितेसूर्यास्तसंधौ॥ यथांगकर्मणा
मिति॥ अंगकर्मणामग्न्यन्वाधानादीनांयुगपदेकप्रधानसंबंधयुगपत्क्रियासंभवादवश्यंभाविनि
क्रमेश्रौतः क्रमआश्रीयात्॥ नतद्वदिहप्रधानकर्मणांपरंसंबंधः येनक्रमस्यात्॥ यस्यैवेति॥ ओवन
विशिष्टमापंप्रातरादिकं॥ तदेवात्राग्निहोत्रादिविधानार्थः क्रमः इति॥ सर्वकर्मणांविधानस्थयुगपद
संभवात्येनकेनचित्क्रमेणविधानमितितेषुक्रमोनाश्रयणीयइत्यर्थः सर्वस्वारात्पइरतिक्रयाश्र
यणेसर्वस्वारान्मृत्युहेतोरुत्तरक्र तेषुकर्मसुमृतस्यकर्मकमस्यासंभवात्॥५॥ स्विष्टकृद्वदिति॥ षनु
बंधतः॥ तद्भावाच्चेति॥ पध्यपूर्वार्ध्यवदाननर्शिपुनस्ततएवावदीयमानेमध्यपूर्वार्द्धगुणवैशिष्ट्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰टी॰
॥१५॥

भावात् शेषस्यावशिष्टस्य शेषत्वात् ॥ स्विष्टकृदाद्यंगकार्यार्हत्वात् ॥ प्रधानत्वं प्रधानकार्यार्हत्वं प्रतिनि
धाने प्रतिनिधिकरणे ॥ ऐंद्रयागनिबंधनमिति ॥ अन्यजन्यमपूर्वमन्येन साधयितुं शक्यत इति ॥ न
देववतादिषु प्रतिनिधिः ॥ मतांतरस्येति ॥ मंत्रस्य कर्मस्मारणसूयदृष्टार्थत्वात् ॥ मंत्रविस्मरणेन यंत्रां
तरं प्रतिनिधेयं मंत्रोच्चारणहीनमेव कर्म कर्त्तव्यं ॥ मंत्रविस्मरणस्य तु न प्रायश्चित्तमनादिष्टादिकार्यं
न हि येषणमिति ॥ दृष्टाक्रियोदाहरणं ॥ न हि प्रयाजा इत्यदृष्टाक्रियोदाहरणं ॥ प्रतिनियतो नीति ॥
तत्तदंगैरेवोत्पाद्यानि ॥ अतोऽदृष्टार्थेषु न प्रतिनिधिः ॥ देवतायाः सर्ववादिसंमतप्रतिनिधेयत्वमुरी
कल्पेदं सूत्रं ॥ कायं देवतामिति ॥ योग्निशब्दक्रियप्रतिसमाहारद्वंद्वः ॥ आग्नेय इति हविषि ॥ तदि
ति देवतात्वं ॥ वरटाः ॥ श्यामाकाकारोऽन्नविशेषः ॥ प्रास इति कोद्रवादौ ॥ परार्थो ह्यसाविति ॥ क्रत्व
र्थाज्यविक्षणादिकर्तृत्वात् ॥ न तत्रेति ॥ गुणपदार्थेषु ॥ स्वप्रार्थनीयं प्रधानसाध्यं फलं ॥ क्रत्वर्था



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिनिवृत्तय इति ॥ क्रतुरूपकाद्याज्यावेक्षणादिसिद्धये ॥ तत्रैव स्वामिप्रतिनिधीयते ॥ न प्रधाने ॥ एतत् च गुणेष्व
स्वामिप्रतिनिधानं ॥ वैकल्पिकपदार्थानां स्वकर्त्तृत्वेनावधारणे सति पश्चादसंभवो ॥ अवैकल्पिकपदार्थानां
त्वसंभवमात्रेनेदिष्टत्वह्युभ्नाताद्रुचनप्रमीतनेदिष्टिनोफलं ॥ असर्वकर्मसंबधात् ॥ अन्येषां तु फलसिद्धा
द्येनेदिष्टे विधानं ॥ अन्यथा सह यजेरन् इति सप्तदशसप्तदशसंख्यासंभवे वैगुण्यात् ॥ यऋत्विजस्ते यजमाना
इति श्रुत्यचपऋत्विजां साक्षाद्यजमानत्वासंसंभवात्तत्संस्कारसंस्कृतत्वेन गौण्यावृत्त्या यजमानत्वं ॥ अस्मि
न्पक्षे च संस्कारेभ्यो ऽदृष्टपरिकल्पनं क्षत्रियवैश्ययोश्च सत्रप्राप्तिः अतो ऽपरः पक्षः ये यजमानास्ते ऋत्वि
क्कर्मस्वधिकृता इति ॥ दृष्टार्थत्वं ॥ क्षत्रियवैश्ययोश्चर्त्विक्कर्मानधिकारसत्राप्राप्तिः अनघश्रुतौ प्रत्या
म्नानात् ॥ प्रतिरूपस्य तत्कर्मकर्तृत्वेन ऋत्विक्सदृशस्याम्नानाद्विधानात् एकः कल्पः तन्नपाद्याजित्व
पंचावनत्वादिरूपः संह्रियत इति ॥ औदुंबर्य्यासंपाद्यत इति ॥ परार्थो हीति ॥ औदुंबर्यर्थमानार्थः अतः प्रमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰टी॰
॥१६॥

णवैषम्येपि न वैगुण्यं॥ स्वार्थोर्थ तेति स्वार्थरूपा पूर्वो अतोपरः पक्षये यजमानास्ते ऋत्विक्कर्मस्वधिकृता
इति दृष्टार्थत्वे क्षत्रियवैश्ययोत्पादकतत्पाद्यागे यथा स्वार्थपरत्वं न तथेत्यर्थः गार्हपत इति गृहपतेः संबंधि
पदार्थे॥ प्रतिषेधकं पदं॥ ब्रह्मसामकल्प इति॥ अतिवर्णब्रह्मसाम्नो भेदः॥ इतरेण क्षत्रियादिना इतरस्य ब्रा
ह्मणादेः केनचित्प्रकारेणेति प्रकाराः श्च सूत्रकारेणैवाग्रे वक्ष्यंते॥ अभ्यनुज्ञेति नञ्प्रसह्यार्थत्वे पूर्वसू
त्रस्य मनुष्यविषयत्वे तद्विषयेणोत्तरसूत्रे संगतिः स्यात् नहि नियतेति आधुनिकानां नियतत्वकथनेन
देहस्यानियतपरिमाणकालावस्थापित्वादनित्यत्वमुक्तं आयुः प्रापकेणेति पूर्वसूत्रोक्ताभ्यधिकतर
जीवनेहेत्वभिधायकमिदं सूत्रं अमृतचरुरिति कर्मणाम पूर्वसूत्रोक्ता नैवंविधमिति वेदेन च दृश्यत
इति लोके मृत्युर्विप्रानिति॥ अपमृत्युः परमायुषपूर्वं घातयितुं इच्छतीत्यर्थः अतः श्रुतिस्मृतिपर्यालो
चनया आयुष्यकर्माभ्यासेन परमायुर्न वर्द्धते॥ किंत्वपमृत्युजय एव भवतीति सिद्धांतः पैतृकेति पितृसंबंधि

राम:
१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रिकथंद्रव्यं॥ यथा तत्कुलोत्पन्नाः पुत्रपौत्रादय उपभोगेन समापयंति न ह्यत्राचान्यति सहस्रसंवत्सरविधा
यकवाक्यस्य अवयवात्फलं नास्तीति कुलमत्र पक्ष दस्य साम्युत्थानपक्ष उक्तः आम्युत्थानमंतरा समा
प्तिः सर्वार्थे तदपीति अपूर्णकर्मणोऽफलत्वात् प्रकृतौ हीति सत्रप्रकृतौ द्वादशाहे द्वादशाहः सत्रमहीन
श्चेत्युक्तत्वात् अगृह्यमाणेति यथा प्रदीपस्य सर्वपदार्थोद्योतकस्य केनचित्पदार्थेन संबंधविशेषो न गृह्य
ते एवमदृष्टोपकारकस्यांगस्यापि केनचित्प्रधानेन न उपकारविशेषोऽतः सकृत्कृतमपि सर्वप्रधानान्यु
पकरोति पुरुषार्थो भावनारूप असौ पुरुषार्थः इडासूक्तकादीनामवदानसाम्यादुपचारादाहुतित्वा
सा एकविंशतिसंख्यातंत्रपक्षे अंगानां सकृत्करणपक्षे इतरस्या प्रतिप्रधानमंगावृत्तौ॥ आहुतिशब्दः
एकविंशतिराहुतय इति श्रौतः प्रतिप्रधानमंगावृत्तौ एकविंशतिसंख्याहुतीनां न संभवतीति आहुतिश
ब्दो लक्षणया आद्यारादिविधिपरं स्यात् पुरुषार्थेनेति उद्योतकत्वरूपदृष्टार्थत्वात् यथा प्रदीप इत्यर्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰टी॰
॥१७॥

वदितिपूर्वोक्तमेवहेतुंप्रपंचति इतरेतरसव्यपेक्षाणीतिफलोत्पादने सहत्वेहेत्वंतरमाह॥यदिचतेषां
इति त्रयोनुयाजतेत्यनुकरणशब्दः तस्मात्समानेति कर्त्तव्यताकानिचप्रधानानिसहभवंतीत्यर्थः
परिक्रयद्रव्यंदक्षिणाद्रव्यं त्रिषंयुक्ताराजसूयांगयागाः नचतेषांत्रयाणांत्रयाणांदक्षिणाद्रव्यैकत्वा
सहभावः समानमुच्चारणमिति सकृत्याज्यानुवाक्यापाठेन सकृदुच्चारणमित्यर्थः एकदैवत्यहविरव
दात्तानांतुयुगपदेवप्रक्षेपः त्यागः पुनर्द्रव्यसंख्यया अनुवाचनेअनुवाक्याप्रैषे प्रैषेचयजेतिप्रैषो॥
यथातत्रैवेति सप्तदशेषुप्राजापत्येषु यथोपांशुयाजेति अतश्चानयोरुत्तमप्रयाजस्विष्टकृत्सूव्यूहन
सूक्तवाकादिषुनतंत्रेणोच्चारणं तेषामेवेति फलकर्मेत्यादिसूत्रोक्तानां यथामित्रविंदेति मित्रविंदायाः
आदिरूपबहुफलायाः सर्वफलार्थंनसकृत्करणरूपंतंत्रं यथाप्रतिकाममाग्नेयस्यापितथासोमप
श्वाद्यसंभवजदोषपरिहाररूपफलभेदाद्वैश्वानरेष्टिः सर्वासंभवदोषपरिहारायतंत्रेणानुष्ठीयते किं

रामः
७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तु तत्काल एव मारुत्या इति वरुणप्रघासेषु दक्षिणाग्नौ होतव्या प्रतिप्रस्थातृकर्तृका मारुती पयस्या देश
भेदादध्वर्युकर्तृकैरितरैर्हविर्भिः सह न क्रियत इति कालभेदेपीति दर्शपूर्णमासयोरेककर्मत्वात्सहत्वे
प्राप्ते कालभेदाद्भेदो भवति तथा सायंप्रातर्होमो कर्मैक्येपि कालेदात् भिन्नौ कर्काभिप्रायात् लक्ष्माजि
नं दंडदीक्षातः प्रान्प्रदमते तु दीक्षणीयेष्टेः प्राग्यजमानस्य दीक्षितत्वात्सायंहोमकाले च प्राप्ते सोयं प्रा
तर्होमौ कर्मैक्यात्सहैव कार्यौ प्रातर्दीक्षितत्वे प्रातर्होमासंभवादारब्धकर्मणश्चावश्यं परिसमापनीय
त्वात् प्रागपवर्गसमित्पर्युक्षणादीनां सायमप्यविशिष्टत्वात् सहप्रयोगे प्रातस्तंत्रतयैवांगानि कर्तव्या
नि गार्हपत्यदक्षिणाग्निहोमयोर्देवतैक्यात्सायंप्रातः संबंधिहोयद्वयं तंत्रेणैव स्रुवेण वद्याद्विती
यस्रुवेण प्रजापतये एवं पक्षहोमेपीत्युक्तलाः देशकालाविति देशकालयोः प्रधानसहत्वविरोध
कत्वेपि देशकालावंगप्रधानयोर्विरोधेन वर्त्तते लक्षणस्य सांगस्य देशे काले च विधानोपदेशात् इत्येकः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्रार्थः द्वितीयवत्सुकर्यादिनांविरोधकत्वस्यवेष्वदेवादेर्व्यभिचारदर्शनादेशकालावेवकांततोवि
रोधेवर्त्तेते दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेतिरूढप्रयोगवाक्यविहितयोरविदर्शपूर्णमासयोः
सकृत्वभेददर्शनात् एतस्यांव्याख्यायामिति अंगप्रधानयोर्देशकालभेदेपिनसकृत्वभेदः कुतसां
गस्यप्रधानस्यदेशेकालेचविधुपदेशात् उपसत्कालीनं उपसत्सुयजः सोत्यानिसोमाभिषवेहोत्र
कर्मसुत्यानत्संबंधान्यरूनीत्यर्थः सकृदिति प्रथमोपक्षद्दिनेद्वादशाहेसुत्याप्रागछेति द्वितीयद्व
कादशाहेसुत्यामिति तृतीयेदशरात्रइत्येवमादि उत्तभेदेनेति प्रथमोपसद्दिने द्वादशाहेत्रयोदश
हइत्यादि त्रयोविंशत्यंचतुर्विंशाहेसुत्यामित्यादि द्वितीयोपसद्दिनेएकादशाहेद्वादशाहइत्यादि
त्रयोविंशत्यहेसुत्यामित्यादि सुसोपलक्षणमिति सुत्यादिनोपलक्षणंतत्संस्कारार्थं सत्रेसोवक
क्षइति पूर्वपक्षइत्यर्थः अत्यरूचिति अतिसुत्यादिनंसर्वाणिसुत्यादिनानिनिगदेपठितव्यानीत्यर्थः



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवयनागच्छन्नपीति मूर्त्तत्वेपि कर्मण्यसंभवापादनादागमनादिकमुक्तं सकृन्मंत्रोवक्तव्य इति॥
यथा प्रथमे परिधिसंमार्जने आदौ सकृन्मंत्रवचनेन सर्वसंमार्जनानां अभिधानसंस्कारस्य कृतत्वा
त्सकृदेव मंत्रं पुनः पुनरभ्यस्यमाना एकैवेयं क्रिया सा च सकृन्मंत्रपाठेनैव संस्कृतेत्यतश्च सकृन्मं
त्रः उक्तेन न्यायेनेति एकक्रियत्वसकृदभिधानसंस्कारकृतत्वरूपेण सकृन्मंत्रवचनाय वादमाह
न ग्रहणेति ग्रहणइति हविर्ग्रहणे लवनस्तरणयोरिति बर्हिर्देवसदनं दामीति तैत्तिरीये बर्हिश्छे
दनमंत्रः सप्रतिबर्हिर्मुष्टिच्छेदनं प्रयोक्तव्यं माध्यंदिनीयानां तु मंत्रानुपदेशात् तूष्णीं बर्हिश्छेदनं॥
अत्रानुपयुक्तमपि बर्हिश्छेदनमंत्रावृत्तिकथनं न्यायप्रदर्शनार्थं वेदेः स्तरणे च न सकृन्मंत्रः आज्ये
ति न सकृन्मंत्रः वाचनिकीति श्रुतिवचनेन साक्षादुक्ता त्रिस्त्रिरिति वचनात् चतुर्थादिग्रहणेषु
मंत्रनिर्वृत्तिः सकृत्सकृदिति वचनादाज्यग्रहणेषु मंत्रनिवृत्तिः इति द्विविधोपि निधः मुष्टाविति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का॰ सु॰ टी॰
॥१९॥

तूष्णीं चतुर्थमिति॥ श्रुतौ मंत्रनिषेधः युगपदिति सम्यक्प्रबोधादर्वाक् युगपद्बहुस्वप्नसंभवः अमनोक्षेति॥
कुत्सितस्वप्नदर्शनेन दीतरप्यइति एकस्या एव नद्याः स्नानसायवांतरप्रवाहाणां भेदे प्रत्यववर्षणमिति॥
प्रतिधारापातमित्यर्थः॥ अनेकामेध्येति॥ विणामद्यादेः वनीवाहन इति॥ चयनांगभूते वनीवाहनाख्ये प्र
याणे॥ प्रति प्रयाणं प्रतिपादविक्षेपं॥ एकमेव नदीद्रव्यमिति॥ नदीभेदे तु मंत्रभेदः॥ तथेति कालैकत्वा
त्॥ अभिहितमेवेति॥ पूर्वसूत्रेभिधत्तं॥ ह्यत्रेति॥ अमनोज्ञस्वप्नस्यैकस्यामेव रात्रौ प्रबुद्धस्य पुनर्दर्शने मं
त्रावृत्तिः कालभेदात्॥ एकस्मिन्नेव प्रयाणे नदीभेदे मंत्राभ्यावृत्तिर्द्रव्यभेदात्॥ एकस्मिन्नेव दिने काल
व्यवधानेन पुनेन पुनरववर्षणे मंत्रावृत्तिः॥ कालभेदात्॥ एकस्मिन्नेव दिने क्षणांतरे अमेध्यदर्शने
मंत्रावृत्तिः कालभेदात्॥ दीक्षितस्य वनीवाहनव्यतिरिक्तप्रयाणाभावात्॥ एकस्मिन्नेव वनीवाह
प्रयाणेंतरावासे पुनः प्रातः प्रप्रणे मंत्रावृत्तिः दिनांतरविशिष्टगमनरूपार्थभेदात्॥ अप्रधानका

रामः
१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तीनेन कस्यचित्प्रधानस्य दर्शपूर्णमासादेः प्रकरणे उत्पन्नं॥ प्रतिकार्येति सर्वकर्मणा प्राधानसंस्कृताग्निसा
ध्यत्वात्॥ सन्निपतितमंगत्वेन॥ अपवर्गेपवृज्येत॥ समासौ समाप्यते॥ तत्र त्वामार्थोद्धृताग्निवत्कर्मान्तरंग
त्वेन त्वन्यदाधानं कार्यं स्यादित्यर्थः स्वकालत्वात्प्रधानांतरासन्निहितस्वतंत्रकालत्वात्॥ साधारण इति॥
सकृत्कृतमग्न्याधानं सर्वकर्मसाधारणं तथा यूपोपि सकृत्कृतोग्नीषोमीयसवनीयानुबंध्यासु साधारणः॥
प्रतिपच्चेति॥ यशर्वा वै यूपमिति वाक्ये पशुसंबद्धस्यैव यूपस्योत्पत्तेः प्रतिपशुमासिं तन्निवृत्त्यर्थं यूपेऽग्न्या
धेयन्यायातिदेशः॥ स्वरूपश्चेति॥ स्वरौ यूपन्यायातिदेशोयं॥ चरुहोमेन यूपसंस्था च वचनाद्यूपस्य साधा
रण्यमागमदिति प्रथमपशौ होतव्यस्वरुः॥ तस्यात्साधारणः निर्वृत्तेति॥ यूपस्य पशुत्रयसाधारण्यात्पुन
स्तत्क्षणाभावात्स्वरोश्च तत्क्षणप्रथमशकलोत्पाद्यत्वनियमाद्यदि स्वरुप्रथमपशोर्हूयेत तर्हि पुनः स्वो
त्पत्तिकारणालाभादनुत्पन्न उत्तरपशोः संस्कारेनतिः पादयेत ततश्च कर्म वैगुण्यं तस्मात्साधारणः प्रथमश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰ सु॰ टी॰
॥२०॥

कलइति॥ तक्ष्णेक्रियमाणेस्वरुरित्यर्थः॥ छेदनप्रथमशकलस्तु यूपावटप्रक्षेपार्थः॥ परिक्रयोदक्षिणा
याऋत्विजांवशीकरणं॥ प्रधानंस्वद्रव्यदेवतोद्देशेनत्यागरूपं॥ परसत्तापादनमिति॥ परोद्देशेनत्या
गइत्यर्थः॥ परसत्तापादनस्यदानएवमुख्यार्थलाभादिहासंगतत्वादेवंव्याख्याफलयुक्तंहीति॥
फलवतितस्मिन्फलभागिनएवाधिकारात्स्वाम्येवत्यागेऽधिकृतः॥ अन्यद्रव्यस्यान्यत्यागायोगा
च्चएकसूत्रपक्षेसूत्रैककर्मणिपुरुषाणांकर्तृत्वंसिद्धवत्कृत्वांगिकृतं॥ सूत्रभेदेतुप्रथमेनविधी
यतेद्वितीयेनापोद्यतइत्येतावान्विशेषः॥ पुरुषयोगीयइति॥ आशिप्रकाशनद्वारापुरुषसंबंधः
प्रत्यगाशीर्युक्तः प्रतीचाआशिषायुक्तः अतः कर्मयोगीप्रजापतेर्भागीसीत्यादिमंत्रआशीयुक्तोध्व
र्युणैवपठ्यः॥ यांवैकांचयज्ञऋत्विजआशिषमाशासतेयजमानस्यैवसेतिश्रुतेः समर्थः सम्यगर्थः
प्रयोजनंयत्राशिषः अतोयजमानस्यएवआशीः प्रार्थनेसामर्थ्यं॥ संस्कारोपीति॥ मुंडनपाननादि

रामः
२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संस्कारस्यापि फलप्रतिग्रहयोग्यतापादनेन यजमानयोगः ॥ आपत्तिशब्दोंतर्भावितण्यर्थो ज्ञेयः ॥ वच
नादिति ॥ पूर्वसूत्रे ऋत्विग्यजमानानां तत्तत्कर्मनियमेपि कर्मांतराधिकारप्राप्त्यर्थं यिदं सूत्रं ॥ हिरण्य
मालिनरति ॥ हिरण्यमायाला च सप्तदश हिरण्यांगुलिकाभिः कार्यो समाचारात् ॥ शेषं स्वामिकर्तृ
का इत्यचन्यता यथाख्यमिति ॥ अध्वर्युः स्वारणे पलक्षितवेदोक्तं याजुर्वैदिकं होता च तेद्वदाग्वैदि
उद्गाता च तद्वत्सायवैदिकम् ॥ उपवीतिनः वामस्कंधस्थितयज्ञोपवीतोत्तरीयाद्दैवं कर्म कुर्युः स्मृतेरि
ति ॥ अग्न्यागारे गवां गोष्ठे ब्राह्मणानां च सन्निधौ उद्धरेद्दक्षिणं बाहुं ब्राह्मणानां क्रियायथेति ॥ तथोपवी
तोत्तरीयधारणेन कर्मसौकर्याय बाहुमुद्धरेत् ॥ वामस्कंधे यज्ञोपवीतं दैव इति स्मृतेश्च ॥ ततश्च तदपचारे
स्मार्त्तमनादिष्टं प्रायश्चित्तं ॥ प्रांच्युदग्वेति ॥ प्राक्संस्थं नुदक्संस्थानि वा कर्माणि ॥ यथा पात्रासादना
दीनि ॥ श्रुतेरिति ॥ एतस्य च प्रागुदगपवर्गस्य श्रौतत्वादपचारे श्रौतमेवानादिष्टं प्रायश्चित्तं ॥ आवृत्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं॰ सु॰ टी॰
॥२१॥

सामंतेष्विति॥ आवर्त्तनं यत्रोक्तं॥ यथा सूर्यस्येत्यावर्त्तत इत्यादौ यच्च सामंतात्कर्त्तव्यं॥ यथास्तरणादि त
त्र प्रादक्षिण्यं॥ सूर्यस्येत्यावर्त्तत इत्यत्र प्रदक्षिणशब्देन॥ एतदपचारे स्मार्त्तं प्रायश्चित्तं पित्र्ये च प्रागु
दक्स्थाने दक्षिणादिक्॥ आवृत्तिसामंतेष्वप्रदक्षिणं च यद्दैवे त्रिस्त्रिः कर्त्तव्यं तत्पैत्र्ये सकृत्॥ यथा
परिसमूहनादि॥ दैवे त्रिः पित्र्ये सकृत्॥ दैवे परिसमूहनादि॥ दैवे त्रिः पित्र्ये सकृत्॥ दैवे परिसमूह
नादेस्त्रित्वं चिंत्यं॥ उल्लेखनं सकलासकलखंडव्यापीति द्विधा मन्यते॥ प्रधानस्थ ये पादे साधनं द्र
व्यं पुरोडाशादि सांगाकृतिः सह दृष्टादृष्टार्थैरंगैः पुनःकरणं॥ आदिष्टानि प्रयुक्तानि॥ आरादुपका
रकैः सन्निपत्योपकारकैश्चांगैः सहीं वृत्तिपक्षमाश्रित्य कृते पूर्वव्याख्याने अरुच्या अपरं व्याख्या
नमाह॥ अपर इति संस्पर्शिभिः सन्निपत्योपकारकैर्दृष्टार्थैर्ग्रहणादिभिः॥ आरादुपाकारकैरदृ
ष्टार्थैराधारादिभिः॥ उभावपीति॥ उभाभ्यां समुच्चिताभ्यां याग इत्यर्थः स सच्चयो विकल्पो वेरित्संश

रामः
२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पः ये गुणा इति ॥ द्रव्यस्य प्रधानयागं प्रति गुणत्वात् गुणा इति व्रीह्यादेर्निर्देशः एकप्रयोजनाः ॥ ए
कं पुरोडाशनिष्पत्तिरूपं दृष्टप्रयोजनं येषां ते ॥ तत्र द्रव्यश्रुत्यानर्थक्यं प्राभूदिति समुच्चय इति पू
र्वपक्षः इतरेतरनिरपेक्षाः पुरोडाशनिष्पत्तौ स्वकार्ये परस्परानपेक्षा व्रीह्यादयः पुरोडाशसाधनत्वे
नोत्पत्तिवाक्येन विधीयंते ॥ दृष्टैकार्थानां समुच्चयो भावाद्द्वितीयश्रुत्यनुग्रहापयागाभ्यावृत्तिप्रा
सां निराकरोति ॥ अनारभ्यत्वादिति दृश्यत इति श्रुतौ हविरुद्वपनं ॥ प्रतित्वेति ॥ उलूखलाप्यूर्पे
प्रक्षेयं व्रीहियवयोर्यदि शब्दश्रवणाद्विकल्पः ॥ अन्यदेव मीमांसकानां विशिष्टस्यार्थान्तरत्वा
त् ॥ व्रीहियवव्यतिरिक्तमित्यर्थः ॥ तच्चाश्रुतत्वाद्यागासाधनं ॥ तथा च भट्टाचार्यकारिका मिश्रै
र्वा यजमानस्य मिश्राणां विध्यसंभवात् ॥ नैव व्रीहिभिरिष्टं स्याद्यवैर्वापि यथाश्रुतैरिति ॥ व्रीहि
परिग्रहे यवश्रुतिरनर्थिका स्यादिति समुच्चयो युक्त इत्याशयेनाशंकापरं सूत्रं ॥ श्रुत्यानर्थक्यमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰ शु॰ टी॰
॥२२॥

ति॥ कालांतरे द्वितीयद्रव्येण कर्मकमरणे॥ एककार्येति॥ आधारनिष्पत्तिरूपमेकं कार्यं येषां तेषां भा
वस्तस्मात् व्रीहिपववदेकार्थत्वादज्वादीनां विकल्पोस्त्विति पूर्वपक्षः धर्मयात्राः अदृष्टार्थाः प्रति
नियतानि प्रतिगुणाभिन्नानि॥ अतोन्यापूर्वस्यान्येनानिधष्यादनात् समुच्चयः॥ परं मुख्यं॥
आधारनिष्पत्तिलक्षणं॥ अवांतरकार्याणि स्वस्वापूर्वाणि॥ होतृकाणां होतृपव्यानां परस्पर
समुच्चयो विकल्पो वेति संशयः॥ तथाधानं मंत्राणां च परस्परं समुच्चयो विकल्पो वेति संशयः॥
दृष्टं प्रयोजनमपि॥ दृष्टार्थानां विकल्पः॥ अदृष्टार्थानां समुच्चय इति संशयोत्थानबीजं॥ समुच्चयो
वाचनिक इति॥ आधानमंत्राणां करणमंत्रत्वाद्विकल्पप्राप्त इत्यर्थः॥ एकस्मिन्प्रकरण इति॥
होतृवेदे एकप्रकरणपठितानां सर्वयाज्यानां याज्यापाठकाले समुच्चयः॥ अनुवाक्यानां चानु
वाक्यापाठकाले पितृयज्ञे साकमेधयागे॥ एकयानुवाक्यया च्यावमंति स्वस्थानादालष्यय

राम:
२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञे संनिधाय यंति ॥ एकस्मिन्कर्मणि ॥ अग्निष्टोमादौ प्रायश्चित्तबहुत्वे एकस्मिन्नेव निमित्ते बहुषु प्रायश्चित्तेषु
कालाहुत्यनाष्टिदिषु ॥ निर्घातार्थं ॥ विनाशार्थं ॥ तन्निर्हति तद्विनाशः प्रयोजनं दृष्टं ॥ ततश्च दृष्टार्थानां विक
ल्पः श्रुतिरस्ति प्रमाणं नास्तीत्यर्थः भिनस्कंन्नादौ प्रत्यक्षेणापि न दोषनाशः प्रतीयत इति ॥ न दृष्टार्थत्वं वि
कल्पमूलं अतो धर्ममात्रमदृष्टार्थं ॥ पर्वणा पर्वमग्नेनेतरत् यथाम्नातस्वरेण यथा आम्नातः पठितः ॥ अध्येतृ
भिः सांप्रदायिकैः तमुनुल्लंघ्य वर्त्तते यस्तेन ॥ एकश्रुत्या उदात्तानुदात्तादिभेदरहितया तानेन ॥ एकश्रुत्या सं
ततरूपेणाविशेषात् स्वरविशेषविधायकश्रुत्यभावात् उपपन्नेति अद्योतपारंपर्यसिद्धस्वरस्य मंत्रस्वरस्य ब्रा
ह्मणे स्वरोपदेशः मंत्राणां कमार्थ एव स्यात् स्मर्यते पाणिनिनाचार्येण श्रुत्यावलीयस्याभाषिकस्वर उ
च्यते स्मृत्याहुर्दुर्बलया एकश्रुतिरित्याशंका अर्थवादपरया श्रुत्या न मंत्रप्रयोग उच्यते यदनुषंगात्स्व
राप्युच्यंते यतो प्रयोगवचनेन विधिवाक्येन कथमंशसापेक्षत्वे स्वविहितप्रधानकरणे उपस्थापितत्वात् प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰ सु॰ टी॰
॥२३॥

करणाधीत मंत्राणां तत्प्रकाशनलिंगेन तत्तत्कर्मसु विनियोगः सिद्ध एवेति न मंत्रविनियोक्त्री श्रुतिः अवि
च्छिन्नपारंपर्यान्नित्या स्मृतिः अर्थवादपरतया श्रुत्या दुर्बलत्वान्न बाध्यते अथवा नित्यवैदिकवचनमू
लत्वान्नित्या स्मृतिरर्थवादत्वान्न बाध्या आनत्यर्थस्य आनत्यमानतिः वशाभावः तद्रूपस्यार्थस्य आ
नत्यर्थमिति आनतिरूपदृष्टप्रयोजनं न धर्ममात्रं नादृष्टार्थं॥ न ददृक्षेत समृद्धः न स्वफसाधरणाद्
उपचारात् ऊवध्यं पुरीषं वसापक्वमांसस्रावितं जलं अध्यूध्नी ऊधस्य प्रदेशे वयोपरिस्थत्वक् संल
ग्नयुदरमांस इति उत्कलः गुर्जरास्तु शतपुटमाहुर्वनिष्टशतपुट उत्कलाः गुर्जरास्तु स्थूलांतरमाहुः पंच
पश्वादि चपने पंच पशुरेको पशुगणः सोमे एकादश पशुगणे पश्वेकादशीनीपक्षे तथा क्रिययेति॥
श्वभ्रावधानादिकया प्रतिपत्तिरूपया प्रतिपाद्यंते कृतप्रतिपत्तिनिः त्रितये॥ द्रव्यार्थसंस्कारत्वेन क्रिया
निवृत्तीति॥ अवदानग्रहणक्रिययानिवृत्तिः चरितार्थस्य कृतप्रयोजनस्य भूतभव्येति भूतं सिद्धं भव्ययसि

रामः
२३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वं तयोसमुच्चये एकवाक्यसहोच्चारणे भूतभव्यार्थमेवेति न्यायः अन्यत्र चरितार्थद्रव्ये क्रियैव द्रव्यार्था क्रय
चोदनेति क्रयनिधेर्गुणा हिरण्यादयस्तेषु इतरेतरेति क्रयरूपेष्वार्थे परस्परानपेक्षत्वात् यक इति वि
द्यमाने सोये क्रयस्य चोदितत्वाद् दृष्टार्थता तर्ह्यपमप्राससोप्रप्रायणार्थो दृष्ट इति अर्थलक्षणेषु सप्र
योजनेषु कर्मणि निष्प्रयोजनस्य संचरणस्याभावादर्थप्रासानुवादोयं न प्रयोजनसंचरणेषु व्यवायप्रा
प्त्यर्था शास्त्रत इति वैधयोः प्रदक्षिणाप्रदक्षिणयोः कृतयोरितरथावृत्तिः न तद्विपरितावर्त्तने कार्यः न य
थाकथंचित् शरीरचेष्टा प्रात्रजातयोः सा चेतरथावृत्तित्रिः प्रादक्षिण्येपि सच्छत् शास्त्रात्प्रविष्टो न यथाक
थंचित् तत्पदार्थेति तस्य व्रतग्रहणपदार्थस्य निर्वृत्तिः कर्मांते तावत्प्रयतं विहितत्वात् तेनैव अपराग्न्योरंत
रेणैव निष्क्रमणं व्रतविसर्गांते एवं ब्रह्मापरेणगमनादिनापि कर्मांते स्वनिवृत्त्युत्तरकाले उत्तरत उपचारो
यस्मिन्निति तसिल् तेन बहुव्रीहिः विहारप्रचारदेशादुत्तरतः करणं यस्मिन्यज्ञे अनियते देशस्य अत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰टी॰१
॥२४॥

नवधारितस्थानविशेषे ब्रह्मवरणादौ अथ हैषेति श्रुतिब्रह्मणवा॥ स्थानविशेषविधायिका चत्वारः अ
ध्वर्युप्रतिप्रस्थातृनेष्टृ उन्नेतारः समाख्यायती ध्वर्युसंज्ञयोः व्यतोविरोधादपीति यत्र च विरोधः कर्मां
तरेणोघसदादौ तत्राध्वर्युरेवाज्यनिर्वापं करोति समावेशे एकस्थानप्रचारे उत्तरमुत्तरं बहिरिति हविष्या
त्रयोः समावेशो हविः सकाशात्पात्रं विहारदेशात् बहिष्टेन व्यवहरणीयं तथा पात्रस्वामिनोः समावेशे
स्वामिनो बहिष्टेन व्यवहरणीयं तथा स्वामृत्विजां समावेशे ऋत्विजो बहिः पूर्वपूर्वमंतरमिति स्वामृत्विजां
समावेशे ऋत्विजः सकाशात् स्वाम्यंतरः स्वामिनः पात्राणि पात्रेभ्यो हवींषि ऋत्विजां चाति ब्रह्मोद्गातृप्र
भृतीनां यथापूर्वं हविः पात्रादिवत् समावेशे बहिरंतरभावः नवाचोदितत्वादिति सूत्रयन्वयमुखेन पूर्व
पक्षे व्याख्याय व्यतिरेकेण व्याख्यानेन सिद्धांते योजयितुमाह॥ एवमभिहित इति आधीतेन व्यतिरेकेण। राम:
प्रतपनादयः आदिशब्दात्पर्यग्निकरणादयः अतश्चाहवनीये श्रपणेपि प्रतपनपर्यग्निकरणादयः गार्ह २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्यादेवं दक्षिणाग्नौ च करंभश्रयणे प्रतयनपर्यग्निकरर्येतत्॥ घृतमाज्यो लिंगादिति सूत्रं घुपांजनादौ आज्यजा
तिनिमित्तं न संस्कारनिमित्तमित्येतदर्थः अनादेश इति यत्र होमसाधनद्रव्यं नोपदिष्टं तत्र प्रायश्चित्तहोमा
दौ अवयवलक्षणाषष्ठीति अतस्तस्यावयावदाय होमो न सर्वस्य यज्ञकर्मणीति धिष्ण्यादिसिध्यर्थं आहव
नीये यजतय इति आहवनीयशब्दः गार्हपत्यसाध्यपत्नीसंयाजादिव्युदासार्थः यजतयः आज्यभागोपां
शुयागाद्याः उपस्ताराभिघारयोः साक्षात्प्रज्ञसाधनत्वमंगीकृत्य पूर्वपक्षमाह केचिदिति सिद्धांतितं निराकरो
ति तत्पुनरिति अन्यद्रव्यांतरमुपस्ताराभिघाराज्यादि वैपरीत्येन उत्पत्तिशिष्टाग्नेयपुरोडाशस्य बाधकरू
पतया उपस्तारादि प्रबलस्य अनुत्पत्तिशिष्टेन दुर्बलेन बाधलक्षणेन वैपरीत्येन बाध्यस्य पुरोडाशस्य बाध
करूपतया उपस्तारादि न संबध्यते उत्पत्तिशिष्टेन गुणेन पुरोडाशरूपेण विरोधात् प्रत्युत उपस्तारादेवैतत्
दुर्बलस्य प्रबलेन तेन बाधात् परंपरया यजतिसाधनत्वादुपस्तारा[illegible]द्यपि ध्रुवाया अस्तु इति पूर्वपक्षय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥क॰सु॰टी॰१
॥२५॥

ति अथेति सिद्धांतीयं पूर्वपक्षे दोषं प्रसजयति तदानीमिति अभिधारणं प्रधिश्रित पुरोडाशस्य उपस्तर
णं पुरोडाशयात्र्याः प्राणदानं पुरोडाशस्य एतेषामपि पुरोडाश संस्कारकत्वात्परंपरया यजति साधनत्वा
त् पूर्ववादी दोषयंगीकरोति अस्तु तथेति सिद्धांत्यनिष्टं प्रसजयति॥ नेति परंपरया सर्वस्य यजति साधन
त्वात् ध्रौवाज्यान्निर्वृत्तौ स्थाली अनर्थिका स्यादित्यर्थः पूर्वमतात्तूयारकीयं मतं सिद्धांतत्वेन गृह्णाति एके
तत्रेति प्रांचौ प्रास्तंस्थौ पूर्वाघारोग्नेर्नैरूतरार्द्धे प्राक्संस्थः उत्तराघारोग्नेर्दक्षिणार्द्धे प्राक्संस्थः अयमर्थ उ
त्तराघारसूत्रे वक्ष्यते विदिशा चेति विदिक्स्थौ तत्र पूर्वः वायव्याद्याग्नेयांता उत्तरस्थ नैर्ऋत्याद्यैशान्यंतः
आहवनीय इत्युत्सर्गसूत्रमेतत् अतः पत्नीसंयाजीदीनां वचनाद्येव गार्हपत्यो हि होमः समाख्यानं प्रया
णं तत्स्वरूपोपादानार्थं चाहवनीयशब्दव्युत्पत्तिप्रदर्शनं कृतं होमार्थस्य होमसाधनस्य द्रव्यस्य स्रुवा
देः सर्वहोमसाधनत्वसिध्यर्थं जुहूरिति अतो नित्यहोमादौ न जुहूः दर्शपूर्णमासविकारत्वाभावात् स

रामः
२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृत् गृहीतीतेत्युत्सर्गसूत्रमेतत् तेन वचनादेवाज्यभागादौ चतुर्गृहीतं भवति ज्ञापयति श्रुतिः यथानु
वाक्यादि चतुष्टयातिरिक्तं सवषट्कारास्वाहुतिषु पंचममवदानीतिरिक्तं तथा वषट्कारास्वाहुतिषु केवलदे
वताद्भावादेकमेनावदानं सार्थकं द्वितीयं त्वतितिरिक्तामिति श्रुत्यापि ज्ञापितं भवति तथेति पूर्वमवदा
नाहिरिक्तत्वेनोदाहियत इत्यर्थः केते द्वे इति चतुरून्नैषीर्द्विरहौषी अथावशिष्टावदानद्वयसंबंधाधेस्य
द्वे आहुती प्रासेते केन वस्तः अतोवदानद्वयमाहुत्यमावादतिरिक्तमिति द्वयोरवदानयोरतिरिक्ततां दर्श
यति श्रुति ८ जमदग्निनामिति जमदग्न्यार्षेयाणां तस्येति संबंधात्पुरोडाशचर्वादेरेव द्विरवदानं तत्र
च्यांगुष्ठपर्वसमचतुरस्रं उपस्तारप्रत्युपस्ताराभ्यां च पंचावतत्वं आज्यावदाने तु जमदग्नीनापय्याज्य
भागोपांशुयारादौ चतुः खतत्वमेव सर्वेषां जामदग्न्या जामदग्न्यानां पांचावतत्वं चतुरवतत्वं वा विक
ल्पेन असंभिदन्निति अवदानमर्यादामनुलंघयन् संभेद संश्लेषः अंगुष्ठपर्वमात्रावदानेन तत्परितो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥क॰सु॰टी॰
॥२६॥

वर्त्तिपुरोडाशप्रदेशेन सह संश्लेषमजनयत् यत् मध्यादवदाने पुरोडाशसंबद्धांगुष्ठपर्वमात्रावदान
मध्ये तदतिरिक्तपुरोडाशप्रदेशमपि क्षिप्तानावद्येत् एवमवदानमर्यादा कृता स्यात् इत्यभिप्रायेणासं
भिंदन्नित्येतस्यार्थमाह अवदानमर्यादां कुर्वन्निति तन्मात्रमिति अंगुष्ठपर्वमात्रं तत्र च स्रुवेणावद्येत् ॥ साम
र्थ्यात् स्वधितिर्यासेद्रवद्रव्ये स्रुवः स्मृतः हस्तकाष्ठे पुरोडाशमवदातुं मचक्षत् इति वचनात् अतोंगुष्ठ
पर्वमात्रं दधिपयोवदानाधारतया स्रुवोप्यंगुष्ठपर्वमात्रवृत्तपुष्करः आज्यमिति स्रुवमात्रं समाचारा
त् एकमवदानं प्रत्यवैतीति प्रधानावदाने संख्यातो न्यूनं भवति तथा जमजग्नीनां स्विष्टाः कृतिद्विर
वदानं इतरेषां प्रधानावदानद्वित्वात् स्विष्टकृत्येकमवदानं प्रत्यभिधारणमिति हविष एवाप्यायनवि
धानात् सकृत् समाचारोक्तप्रत्यवदानस्थानमिति सिद्धांतोयं श्रुतेः उपरिष्टात् चतुर्थाध्याये अनुवाच
नमनुवाक्या प्रैषोऽग्नये नुब्रूहीत्यादि आश्राव्यमैषो ॥ आश्रावणानंतरं भाविनि प्रैषे ॥ अयं च प्रेष्यप्रै

राम:
२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षः समैत्रावरुणाके कर्मणि अत्र देवतापदस्य चतुर्थ्यंतता ॥ हविःपदस्य द्वितीयांतता छागादिपदस्य षष्ठ्यं
तमपि द्वितीयांतपदसंबंधमात्रद्योतकत्वात् द्वितीयांतपदविशेषणत्वात् चाप्रधानं अयुं यजेति याज्याप्रै
षो मैत्रावरुणरहिते कर्मणि प्रैषानुवाचने इति मैत्रावरुणप्रैषसंबंधेऽनुवाचने देवतापदे चतुर्थी द्रव्यपदे ष
ष्ठीविभक्तिर्भवति यथा इंद्राग्निभ्यां छागस्य हविषोनुब्रूहीति वपायै इति धानासोमेभ्य इति च पदद्वयमुक्त्वा अ
नयोः पदयोः प्रैषसंबंधानुवाचने षष्ठी भवतीत्यर्थः असौ यजेति प्रषास्तर्पजब्रह्मन् यजेत्यादिषु देवता
पदं द्रव्यपदस्य षष्ठीविभक्तिपनुन्नास्यात् प्रैषेन प्रयोज्येत्यथ येति यथा होतृवरणेऽसौ मानुष इत्य
त्रासाविति पदं व्युदस्य तत्स्थाने प्रथमांतहोतृनामादेश उपलक्षणं च इदं अतोऽमुष्मा अनुक्तस्वमुं यजे
त्यादौ च सर्वनाम पदमपोह्य चतुर्थ्यंतद्वितीयांतदेवतादिनामपदादेशः कार्यः सवषड्भाणस्विति जुहो
ति व्युदासः वितानस्या आहवनीयसंनिहितविहारप्रदेशस्य दक्षिणत उद्वङ्माङ् व्यावस्थितः ॥ ऐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰टी॰
११२७।

शान्याभिमुखः ऐशान्यभिमुखता सिध्यर्था च दक्षिणत इति दक्षिणसन्निहित आहवनीयनैर्ऋत्य
देशोग्न्याद्यः वषट्कृते वषट्कारे समाप्ते सह वा वषट्कारोच्चारणसामकालं वा उभयत इति उपस्तारा
भिधारणाज्यं हविर्होमस्यादावंमेव कारयेत् हविषा सह वाज्यं जुहुयात् इति द्विधा होमप्रकारः ९
अस्य सूत्रस्य पूर्वसूत्रैः सह प्रासंगिकसंगतिमाह प्रैषाः प्रक्रांता इति कर्मचोदको विषयः स एव
ऋचो यजूंषीति सूत्रे य उक्तः करणमंत्राः उरुप्रथा इत्यादयः जपमंत्राः मयि दमित्यादयः विधिवि
भक्तियुक्ताः लोड्युक्ताः वर्त्तमानं विधेयत्वेन वद्वौ स्थितं श्रुतार्थहानिरिति विहरसृणीहीत्यादि श्रुतो
पोर्थो कर्मचोदकरूपः तस्य हानिः परित्यागः तवैवेतीति कन्यारववहत्वित्यादीन्न वैशब्दान्तमंत्रा
नपतप्य पूर्वपक्षोयं तवैशब्दांताः ब्राह्मणं तर्पयितवा इत्येवमादयः प्रैषाः न मंत्राः तवैशब्दस्य मंत्रचि
ह्नत्वाभावात् इदं च तवैशब्दाकृत्वेन मंत्रवैलक्षण्यप्रदर्शनं तवैशब्दांतैष्टेव न सर्वप्रैषेषु तेष्टेव हेतोः

राम:
२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संभवात् सर्वप्रैषाणां च विचार्यत्वकाटिनिक्षेपात् उपक्रमभंगासंभवात्तस्माद्यतस्तवैशब्दांताः अतः प्रैषत्वा
न्नमंत्राः प्रैषाणां तु मंत्रत्वविचारे कृते सेत्स्यतीति न प्रैषत्वादपि मंत्रत्वं वक्तुं शक्यते इति वचनाकृत्वाभावाच्च
न मंत्रत्वं मंत्रत्वेन निर्दिष्टा ऋग्यजुः सामस्वनाम्नानात् च न मंत्रत्वं अप्यवा विधिविभक्तियोगात्कर्मनिर्देशश
क्तियुक्तत्वाद्विध यएवैते न मंत्राः सिद्धांतमाह मंत्रे वैवविति विहरत्यग्नीदग्नीं नित्यादिवाक्यांतरोक्तार्थाभि
धानान्मंत्र एवैतैर्न विधय मंत्राणां विधिवाक्योक्तार्थं स्मारणैकरूपत्वात् विधित्वे दोषमाह न चेति हरती
त्यादिवाक्यविहितस्य पुनरनेन विधानाभावात् विहितस्याभिधाने तु न कश्चिद्दोषः अथवा एतेषां प्रयो
गकाले एवैषां पठनीयत्वोक्तेरेते मंत्रा व्यतिरिक्तो विध्यादिप्रयोगकाले पठ्यते मंत्राणामंवपदार्थस्मारक
त्वेन कर्मणि समवेतत्वात् वर्तमानोपदेशक इति विधिवाक्यादवधारितस्य पदार्थस्य स्मारको मंत्रो भवति
यतः मंत्रत्वेप्येतदिति विहरस्तणीहीत्यादीनां विध्यर्थत्वे श्रुतार्थहानेर्विधित्वं कल्प्येत प्राप्तकालार्थत्वे तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कसु॰ टी॥१
॥२८॥

नश्रुतार्थहानिरिति मंत्रा एवैतेन विधयः पूर्ववादे तवैशब्दांतस्य प्रैषत्वमंगीकृतं इति शब्दांतस्य च मंत्रत्वं॥
सिद्धांतत्वे तन्नियमव्यभिचारमाह तवैचेतीति निर्दिष्टा हीति अहिर्बुध्न्येत्यादि मंत्रे पूर्वव्याख्यापायप
रितोषे कारणमाह उक्तमेव हीति अतः पौनरुक्त्यमित्यर्थः उक्तमपि निगदानां मंत्रत्वं सर्वविषयव्यापि
नस्यादिति पौनरुक्त्यपरिहारमपाकरोति विषयव्याप्तिरिति व्याख्यांतरमुपक्रमते इदमामनंतीति॥
शक्नोति हीति अग्निर्वै देवानामुखमित्यर्थवादसंयोगाद्दत्ते हूल्पनाद्वारेणाविधिरेवायं पएवमादिभिरिति
वाक्यांतराभिहितार्थप्रकाशकत्वान्मंत्रस्येत्यर्थः अर्थप्रसंख्ययेति अर्थप्रयोजनं निष्पाद्यं यागहोमादि
तस्य प्रसंख्यया निष्पत्त्यया हेतुता द्रव्यस्य तत्साधनभूतस्य पात्रहविरादेरुपकल्पनं संपादनं यावद्भिः
पात्रादिभिर्यागः सिध्यति तावतामुपयुक्तानां उपकल्पनमित्यर्थः चर्माणि हरिणवृषाणि संबंधीनी॥ राम:
उत्तरलोमानि उत्तरस्मिन्नुपरिभागे लोमानि येषां तानि यथा दीक्षात्स्तत कृष्णाजिनानि सामान्यविधि २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रयं क्वचित्प्रत्यग्निवमीत्यादिविधिना बाध्यते अवरोक्तमिति यथा बोमीयं हविराग्नेयात्यश्चादभिहि
तं सादनादौ देश उत्तरग्रहणहोमादौ कात्वतउत्तरं रं च क्रियते एकद्रव्य इति साज्यैकपात्रे धारणादिव्या
धृतेर्दक्षिणहस्ते वामेन वेदं धारणं साज्यमेकपात्रं व्यावृत्ते तु करद्वयेन वेदोपग्रहः आज्यव्यतिरिक्तो द्र
व्यवति पात्रे दक्षिणहस्ते व्यावृत्ते वामेन तु स्फ्यग्रहणं वेदवज्रेति यत्राग्निहोत्रादिकर्मणि वेदवज्रौ आ
सादनादिसंस्कारैरनिष्पन्नत्वाद्द्वितीयं रुध्यं पात्रं वामहस्तावरोधकं नास्ति तत्र कुरोरुपग्रहणं अस्मि
न्सूत्रार्थे याज्ञिकसंप्रदायानिष्पन्नं देवे वजे कर्मणि जपोपस्थानादिषु हस्तावरोधकद्रव्यवर्जितकर्म
सु स्फ्योपग्रहणे आज्यादितरद्रव्ययुक्तपात्रनियतत्वात् हस्तावरोधकद्रव्यवर्जितजपोपस्थानादौ कु
शैरेवोपग्रहणं वाच्यफलेषु कल्प्यफलेषु समर्थाः सम्यगर्थाः प्रयोजनफलरूपं यास्तांताः सापेक्षाः फ
लापेक्षाः अनर्थिकाः निष्फलत्वात्पुरुषाप्रवृत्तेः इति नैरुत्सुक्यात् एवं अनुषंजेन नैरुत्सुक्यान्नैराकां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰सु॰ टी॰
॥२१॥

स्यात् सामर्थ्यात् सर्वप्रार्थयतित्वरूपात् गुणविशेषइति॥ यथात्रिरात्रषोडशिनि विकल्पितेपि यदिग्र
हणं तदा गुणविशेषात्फलविशेषो यदि न ग्रहणं तदा न विशेषः यदि वैकल्पिकः पदार्थकृतः सन्फल
विशेषं न साधयेत्तर्हि पक्षे आम्नानमनर्थकं स्यात् करणाकरणयोः फलविशेषात् दक्षिणादेः कर्त्ता य
जमानः नाध्वर्यादि वाचने मंत्रपाठस्य अन्वारंभणे वरेवरप्रार्थने वरणे ऋत्विजां व्रते पयोव्रतादौ प्र
माणे वेदीपात्रादीनां एषु सर्वत्र यजमानः कर्त्ता क्रमेणोदाहरणीति यथाधाने षट् दक्षिणाः प्रतिवि
भज्य ददातीति तत्रैव चातुष्प्राश्ये वरं ददातीति अश्वं ददाति हिरण्यं ददातीति इत्यादि यथा सोमक्र
मे शुक्रं त्वेति हिरण्यमालंभ्य वाचयति॥ यथा सान्नाय्ये दोहयत्यशूद्रेण स्थाल्यन्वारब्धे यथाग्निज्यो
तिष्टोमे वरं कृत्वा ददाति च यथाग्निष्टोमे षोडश र्त्विजो इत्याद्युन्नोतॄन् वृणीत इति यथाधाने ब्रह्म
चार्याग्निनित्यधारीत्यादि यथा निरूढपशोस्त्र्यरत्निश्चतुररत्निरित्यादि यजुषां क्रियापाठः॥ क्रि

राम:
२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याद्वारक इतिति क्रियाप्रकाशनमेव कर्मसमवाये द्वारं यस्य क्रियेव चेत्सिद्धखातादीनां ग्रहणे संपन्नात्तर्हि क्रियमा
णार्थप्रकाशकाणां मंत्राणां नास्त्यवसरोऽत उक्तं तत्तद्यजुषां क्रिया न संभवतीति एतत्चेति एतत्च सिद्धखातादि
ग्रहणे मंत्रपाठं नानाशाखागतविकृतिकर्मानंत्यत्वाद्यत्र विकृतिकर्मणि वचनात् सिद्धखातादिग्रहणात्खनना
दिक्रियायाऽसंभवः तद्विषयमित्यर्थः अतश्च आपदि खातादिग्रहणे तत्तन्मंत्रैस्तेते संस्काराः कार्ण एव नियमा
पूर्वार्थं आपदि एकस्यैव सकलार्त्विकपदार्थकर्तृत्वे प्रैषाः सर्वेपि स्युः धर्ममात्रार्थाः प्राकृतात्सहाभावात् यथाद
र्शपूर्णमाससान्नायादिषु सिद्धपिष्टदुग्धादिग्रहणे तत्तन्मंत्रैस्तेते संस्काराः क्रियंते नियमापूर्वार्थं याज्ञिकैः अ
तोऽस्य सूत्रस्य विकृतिविषयत्वमेव नायद्गृहीतसिद्धखातादिविषयत्वं आत्मानं चालभ्येति यत्रात्मानमाभेल
त इत्युक्तं तत्र अतश्च ननाभ्यालंभादौ उदकस्पर्शनसूत्रावृत्तिरध्यायादिसमाप्तिद्योतकया वीप्सया च अनुक्रां
ताध्यायोक्तार्थानिश्चय आवेषते भगवता कात्यायनेन यथा लोके होदर्शनीया होदर्शनीयेति विप्सा तदर्थं प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का॰सु॰टी॰
॥३०॥

कर्षनिश्चायिकाखकृतव्याख्याने पंडितानामनुग्रहं प्रार्थयते त्रयीसारेति त्रय्याः सारेस्य समुद्धाररूपयदि
दं कलसूत्रयोदशारात्रमहत्त्ववासाइत्यस्मिन्पक्षेत्रैवैत्यजस्राग्निष्विति॥ अजस्रोत्सर्गार्थत्वाच्च। इष्ट्वाग्नीनुत्सृजतीति। अतः सोमप
श्वोर्विवृतित्वं। सुयवसान्यथाप्राप्यात्॥ कालयेत्॥ वृषिसिद्धये बलीवर्द्धान्। एवमेवाग्नीन्सुप्रीतान्हव्यवाहनाय कालयती
तिलिंगान्नात्यंतत्यागः। भक्षणेनप्रीतिबलीवर्द्धप्रस्थापनं। यथाकर्षणार्थं। एवममजस्रहोमेनसुप्रीताग्नीनांत्यागात्।
कर्मांतराणि कर्तव्यानि। तदाहुः। पुनश्चनित्यः सोमः पशुर्वा कर्तव्यः आधानं वृत्वापूर्वाभ्यांनित्याधिकारसिद्धेः अग्नि
होत्रकार्यस्य त्रयोदशारात्रहोमेनैवसिद्धत्वान्नाग्निहोत्रहोमः। पुनश्चनित्यः सोमः पशुर्वेतिद्वयोर्नित्ययोरुपादानात् नित्या
धिकाराग्निहोत्रहोमनिवृत्तिः। अग्निगुप्त्यर्थमग्निहोत्रंकर्तव्यमेवाधानेवृते। उपदेशत्यागआत्यंतिकइति। यथासुयव
सानित्येतदर्थवादमात्रमिति। प्रातर्होमंवृत्वाजस्रोत्सर्गउभयत्र। द्वादशोजस्रेत्रयोदशाहाजहेत्यात्रंतस्यव्याख्यानं। य
न्यथा आहृतं वृतंतंसाधवः साधुत्वेनानुगृह्णंतु। एतस्याध्यायस्यसकलसूत्रप्रांतनिवेशेनव्याख्यातत्वात् इदंस्वव्याख्या

रामः

३-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰ सु॰ टी॰

॥३१॥

नेलोकाददाप्रार्थनंसकलसुत्रव्याख्यानंपरंद्रष्टव्यं ॥ इति श्रीकर्कोपाध्यायकृतकात्यायनसुत्रविवरणटीकायांपदयोजनाख्या
यांप्रथमोध्यायः ॥ ५ ॥ योद्धा योद्धावधी तान् सपदि पलभुजः संपराये पराये येनायेनाश्रितानां स्तुतिरचनमितेशानचापेन चा
पे ॥ लंकालंकारहर्ता ककुभि ककुभि यः कांतया सीतया सीदुनोदुनोथ हृष्टः स विभुरवतु वः स्वः सभार्यः सभार्यः ॥ १ ॥
दामोनामकदैत्यश्चदंपत्योर्हृदिसंस्थितः । तस्यदुष्टस्यनाशायघृतेनापोशनंकुरु ॥ २ ॥ प्रत्यक्ष १ अनुमान २ शाब्द ३ उपमान ४
अर्थापत्ति ५ अनुपलब्धि ६ ऐतीह्य ७ संभव ८ चार्वाकाः १ वैशेषिकानास्तिकाश्च २ संख्या ३ नैयायिकाः ४ प्राभाक
राः ५ भाट्टाः ६ पौराणिकाः ७ अर्थाप ८ ॥ सर्वाधान्यथवाप्यर्धाधानीवाप्यावसथिकः । परस्परंतुभुंजीर्युनोगिरु
ह्यायतस्त्रयः ॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=14.07.20 10:41
,TRANSFERRED=2020/07/14 at 10:48:39
,PAGES=63
,TYPE=STD
,NAME=S0003305
,Book Name=M-2698-KATYAYAN SUTRA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection